Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SHISRRJ | Volume 1 | Issue 3 | ISSN : 2581- 6306

# वैयाकरणशिरोमणि: श्रीनागेशोऽपि प्रसिद्धाप्रसिद्धभेदेन लक्षणास्वरूपविमर्श

डॉ. छगन लाल महोलिया
सह आचार्य – संस्कृत, श्री रतनलाल कंवर लाल पाटनी, राजकीय स्नात्तकोत्तर महाविद्यालय, किशनगढ़, अजमेर।

**शोधसारांशः**– नैयायिका: स्वबोध्यपदवाच्यत्वसम्बन्धेन 'द्विरेफ' पदे लक्षणावृत्ति माध्यमेन 'भ्रमररूप' जन्तुविशेषस्य बोध कृतवान्। स्वं द्विरेफ पदं तद् बोध्यं 'भ्रमर' पदं तद्वाच्यत्वं भ्रमररूपेऽर्थे इति तत्सम्बन्धसत्वाद् बोधकत्वं। एवञ्च 'द्विरेफ' पदमेव निरूढलक्षणया स्वबोध्यपदवाच्यत्वसम्बन्धेन भ्रमरं बोधयेदिति परास्तम्। तस्माच्छक्यताऽवच्छेदकारोप एव लक्षणेति सिद्धा।
**मुख्यशब्दाः**– वैयाकरणः , श्री नागेशः ,लक्षणा. धातुः. बोधः. नैयायिकाः, वाचकः।

लक्ष्यतेऽर्थोऽनयेति करणव्युत्पत्या लक्ष्- धातो: ल्युट्प्रत्ययेन लक्षणापदं निष्पद्यते। अन्वयोपपत्तये तात्पर्योपपत्तये वा विरतायामभिधायां लक्षणाया उपयोगो भवति। पदवाक्यप्रमाणज्ञा: स्वस्वशास्त्रानुसारेणेमां लक्षणामाटीकन्ते। तथा हि- स्वशक्यसम्बन्धो लक्षणेति नैयायिका:। स्वबोध्यसम्बन्धो लक्षणेति मीमांसका:।

लक्षणाशब्दशक्तिं परिभाषमाण: मम्मट: लिखितवान् -

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।**

अर्थात् मुख्यार्थस्य बाधिते सति, तेन मुख्यार्थेन सह लक्ष्यार्थस्य सम्बन्धे सति रूढे: अथवा प्रयोजनविशेषात् यथा शब्दशक्त्या अन्योऽर्थ: लक्ष्यते स: शब्दस्य आरोपित: व्यापार: लक्षणाऽभिधीयते।

उक्तं यथा साहित्यदर्पणकार:

**मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थ: प्रतीयते।**
**रूढे: प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता।।**

शाब्दिकदृष्ट्या तु शक्तेरतिरिक्ताया लक्षणाया अङ्गीकारे शाब्दबोधनजनक-पदार्थोपस्थितिं प्रति शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन कारणतायां गौरवं विचार्य 'शक्तित: पृथक् लक्षणारूपा अतिरिक्ता वृत्तिर्नास्ति' इति राद्धान्तो महाभाष्यानुमोदितो वैयाकरणभूषण-सारकारादीनाम्। वैयाकरणशिरोमणि: श्रीनागेशोऽपि प्रसिद्धाप्रसिद्धभेदेन, शक्तेरेव द्वैविध्यं निश्चीय लक्षणा, 'अप्रसिद्धशक्तितो नातिरिक्ता स्वतन्त्रता च वृत्तिरितिसम्यगुपपादितवान्। तत्र आपामरविद्वज्जनवेद्यत्वं प्रसिद्धत्वम्, यथा गङ्गापदस्य जलप्रवाहरूपेऽर्थे प्रसिद्धा शक्ति:। सहृदयमात्रवेद्यत्वमप्रसिद्धत्वम्, यथा 'गङ्गायां घोष:' इत्यत्र गङ्गापदस्य तीररुपेऽर्थे अप्रसिद्धां शक्ति:।

किञ्च 'आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्ति-बोधे व्यक्तिविशेषबोधे वा लक्षणा इति व्यवहार: इत्युक्त्या परमतसिद्धौ लक्षणा इति व्यवहार इति सूच्यते, स्वमते तु शक्तिरेव इत्यपि 'शक्त्यैव तत्पदवाच्यत्वे इत्युक्त्या सूच्यते।

**लक्षणाबीजविमर्श:-** लक्षणाबीजविषये मञ्जुषाकार: कथयति यत् वस्तुतस्तात्पर्यानुपपत्तिरेव तद्बीजम्। अन्यथा 'गङ्गायां घोष: इत्यादौ घोषादिपदे एव मकारदिलक्षणापत्ति:, तावताऽप्यन्वायानु-पपत्तिपरिहारात्।

**अत्र कुञ्जिकाकृतस्तु** - अन्वयानुपपत्तेर्लक्षणाबीजत्वं दूषयति। ये त्वाहु:- ''अन्वयानुपपत्तिरेव लक्षणाबीजम्'' अस्ति च 'यष्टी: प्रवेशय' इत्यादावपि भोजनविषयकप्रवेशान्वयस्य यष्टिष्वनुपपत्तिरिति। तद् दूषयति- किञ्च अन्वयानुपपत्तेर्लक्षणाबीजत्वं न तज्जनकत्वम्। शक्यसम्बन्ध रूपाया लक्षणायास्तदजन्यत्वात्। नापि लक्ष्यार्थतात्पर्य-ग्राहकत्वं, प्रकरणादिनापि तत्परत्वसम्भवात्। नापि लक्ष्यार्थबोध हेतुत्वं, यष्टी: प्रवेशयेत्यादौ व्यभिचारात्। घोषादिपदे इति। न विधौ पर: शब्दार्थ इति न्यायात् गङ्गापदे एव लक्षणेत्यन्ये। कुशल इत्यत्र रूढि:। एवं गङ्गायां घोष:' इत्यत्र शैत्यादिप्रतीति: प्रयोजनमित्यर्थ:। यथाहि गङ्गायां घोष: इति वाक्यात् पावनत्वं प्रतीयते, न तादृशं 'गङ्गातीर' इति वाक्यात्। एवञ्च मुख्यार्थबोध: शक्यार्थसम्बन्धो रूढिप्रयोजनान्यतरच्चेति हेतुत्रयं बोध्यम्।

**उक्तं यथा कलाटीकायाम्-** यद्यपि लक्षणाजन्यबोधेऽन्वयव्यतिरेकाभ्यां मुख्यार्थबाधज्ञानं मुख्यार्थसम्बन्धज्ञानं च कारणम् तद्बाधश्च समभिव्याहृतपदतात्पर्यविषये मुख्यार्थतावच्छेदकरूपेण मुख्यार्थसं सर्गरूप:। तेन 'छत्रिणो यान्ति' कुन्तान्प्रवेशय 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ छत्र्यादिमुख्यार्थानां समभिव्याहृत क्रियासु कर्तृत्वादिभिरन्वयाबाधेऽपि तत्तात्पर्यविषयेषु छत्रयच्छत्रिगमनभोजनार्थप्रवेशदध्युपघातकावधिकरक्षणेषु मुख्यार्थतावच्छेदकरूपेण तदन्वयबाधोऽस्त्येवेति। तत्र छत्रिपदमेकसार्थप्रविष्टच्छत्र्यच्छत्रिसमुदाये लाक्षणिकम्, एवमन्यत्रापीति।

**उक्तं यथा रत्नप्रभायाम् -** नैयायिका: अन्वयानुपपत्तेर्लक्षणाबीजत्वं मन्यन्ते। किञ्चान्वयानुपपत्तौ लक्षणाबीजत्वं किम्? एतस्मिन् विषये उक्तं रत्नप्रभायाम्- न हि लक्षणाजनकत्वरूपम्, शक्यसम्बन्धरूपलक्षणायास्तज्जन्यत्वासम्भवात्। नापि लक्ष्यार्थविषयकतात्पर्यग्राहकत्वम्, प्रकरणादितोऽपि तत्सम्भवात्। नापि लक्ष्यार्थबोधहेतुत्वम् 'छत्रिणो यान्ति' इत्यादौ व्यभिचारात्।

**अयमाशय:-** नैयायिका हि अन्वयानुपपत्तिप्रतिसन्धानमेव लक्षणाबीजं मन्यन्ते। नागेशभट्ट: तात्पर्यानुपपत्तिप्रतिसन्धानमेव तद्बीजं मन्यते। तन्मते यदि हि अन्वयानुपपत्ति-प्रतिसन्धानमेव लक्षणाबीजं स्यात्तदा 'गङ्गायां घोष:' इत्यत्र घोषपदे मकरादिलक्षणायाऽपि तत्सिद्धि: स्यान्न च तेन तात्पर्योपलब्धि:। उक्तं यथा परमलघुमञ्जूषाकार: 'गङ्गायां पापी गच्छति' इत्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च'। एवमेव 'गङ्गायां पापी गच्छति' इत्यत्र पूर्वपक्षमात्रग्रहणे तु गङ्गापदे नरकलक्षणा स्यात्तावताऽप्यन्वयोपपत्ते:। तात्पर्यग्रहणे तु पापिपदस्य पूर्वोपात्तपाये जने लक्षणया न तथाऽऽपत्ति:। तथैव 'नक्षत्रं दृष्ट्या वाचं विसृजेदि' त्यत्र यदा कदा दिवाऽपि नक्षत्रदर्शनसम्भवादन्यवलाभेऽपि तेन रात्राविति यत्तात्पर्य तस्यालाभेनेव तत्र लक्षणा भवति।

केचिद्वदन्ति यन्न हि सर्वत्र तात्पर्यानुपपत्तिरपि। 'आयुर्वै घृतम्' यजमान: प्रस्तर: इत्यादौ न हि तात्पर्यानुपपत्तिरपितु अन्वयानुपत्तिरेव। तेन अन्वयतात्पर्यान्य-तरानुपपत्तिर्हि लक्षणाबीजत्वेन स्वीकार्येति तेषां पक्ष:। तत्र तात्पर्यानुपपत्तिरूपैकानुग-मकस्वीकारेणैव निर्वाहसम्भवात्। अनेकानुगमकस्वीकारे गौरवाच्च तात्पर्यानुपत्तिरेव लक्षणा बीजत्वेन ग्राह्येति ग्रन्थकृदाशय:।

**निष्कर्ष:-** शाब्दिकनये आरोपरूपलक्षणायाः बीजविवेक आरोपस्यावसरार्थं न केवलमावश्यक: अपित्वनिवास इति कृत्वा विचार्यते। 'पुंयोगादाख्यायामिति' सूत्रस्थभाष्येण तात्पर्यानुपपत्तेस्तद् बीजत्वं प्राप्यते। तथा च चतुर्भि: प्रकारैरतस्मिन् स इत्येतद् भवति 'इत्यत्र चतुर्थप्रकारस्योदाहरणं' यष्टी: प्रवेशय' इति निर्दिष्टम्। अन्वयानुपपत्तिस्तत्रना-स्त्येव। नागेशभट्टमहोदया अपि इमामेव पद्धतिमनुमोदन्ते। अत एव च घोषादिपदानां मकरादिषु लक्षणाया वारणं 'गङ्यां घोष:' इत्यादौ सम्भवति। आयुर्वै घृतम् इत्यादौ वेदे तात्पर्यानुपत्तेरभावेन। तात्पर्यान्वयान्यतरानुपपत्तिमेव तद्बीजं स्वीकुर्वन्ति रत्नप्रभाकारा:।

उक्तं यथा वेदान्ते ''लक्षणाबीजं तु तात्पर्यानुपपत्तिरेव त्वन्वयानुपपत्ति:। 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र अन्वयानुपपत्तेरभावात्। 'गङ्गायां घोष:' इत्यादौ तात्पर्यानुपपत्तेरपि सम्भवात्।'

नैयायिकानाम् अद्वैतवेदान्तिनाञ्च मते 'काकेभ्यो दधि रक्ष्यताम्', यष्टी: प्रवेशय इत्यादौ अन्वयानुपपत्यभावेन तात्पर्यानुनपत्तिरेव तद् बीजम्।

पूर्वमीमांसकास्तु वेदे कर्तृपुरुषाभावेन तात्पर्याभावादन्वयानुपपत्तिमेव तद्बीजं मन्यते। वस्तुतस्तु तात्पर्यविषयीभूतान्वयानुपपत्तेबीजत्वे 'यष्टी: प्रवेशय' इत्यादौ न काव्यनुपपत्ति:। मुख्यार्थबाधे, तद्योगे ज्ञाते भवति लक्षणा' इति शिष्टोक्तिसमन्वयोऽपि सम्पद्यते। यतो हि 'मुख्यार्थबाधे' इत्येतावता मुख्यार्थान्वबाधे इत्यस्य लाभेऽन्वयानुपपत्तिरेव तद् बीजं स्वीकरणीयं भवति।

शाब्दिकनये तु अस्यैव संकुचितं स्वरूपं तात्पर्यविषयान्वयानुपपत्तिरित्यस्य बीजत्वे न विप्रतिपत्तिलेश:। तथ्यस्तु तात्पर्यानुपपत्तावेव अस्यापि पर्यवसितिरिति सम्यगुपपद्यते सर्वम्। आयुर्वै घृतम् इत्यादावपि तदन्यबोधेच्छया अनुच्चरितत्वे सति तद्बोधजननस्वरूपयोग्यत्वं पदनिष्ठतात्पर्यं गृहीत्वा सामञ्चस्यं सम्पद्यते इति दिक्।

**नैयायिकमतेन लक्षणास्वरूपम् -** ''शक्यसम्बन्धो लक्षणा'' इति लक्षणालक्षणं नव्यनैयायिकका: स्वीकुर्वन्ति। उक्तं यथा मञ्जूषायाम् - 'सम्बन्ध एव लक्षणेत्यन्ये। परमलघुमञ्जूषायाम् 'ननु लक्षणा क: पदार्थ: इति चेत्। अत्र तार्किका:' ''स्वशक्यसम्बन्धो लक्षणा'' अर्थात् स्वस्य स्वसम्बन्धस्य शक्यस्य शक्त्युपस्थापितार्थस्य सम्बन्ध: सामीप्यसादृश्यमसमवाय-वैपरीत्यक्रियायोगादि: कश्चन यथायोग्यसम्बन्ध: लक्षणा इति। तेन शक्यार्थसम्बद्धत्वमेव लक्षणाया लक्षणम्। अत्र ज्योत्स्नाकृत:- 'यादृशानुपूर्व्यवच्छिन्नं नाम यद्धर्मविशिष्टयन्निरूपितशक्तिशून्यत्वे सति न यद्धर्म विशिष्टयन्निरूपतिसम्बन्धनिरूपित-शक्तिनिरूपकं तद्धर्म-प्रकारकतद्विशेष्यकबोधे तादृशानुपूर्व्यवच्छिन्नं नाम लक्षणमिति लक्षणार्थ:' इति। तेन शक्तं पदं तत्परम्परा सम्बन्धो लक्षणेति।

नैयायिकैः 'शक्यसम्बन्धो हि लक्षणा' इति स्वीकृत्य तात्पर्यानुपपत्तिर्लक्षणाबीजं मन्यते। यथा 'गंगायां घोषः' इत्यत्र गंगापदस्य प्रवाहरूपशक्यार्थेसम्बद्धतीररूपोऽर्थो बोध्यते। अतोऽत्र गंगापदेन तीरस्य स्मरणं भवति तदनु 'गंगातीरे घोषः' इति शाब्दबोधो जायते। अत्र गंगापदस्य घोषपदार्थेन सहान्वयाभावाद् गंगा पदस्य गंगाप्रवाहसम्बद्धतीरस्य बोधो भवति।

सा च लक्षणा स्वाश्रयसम्बन्धिवाचकत्वेन पराश्रया ज्ञेया। एवं लक्षणा तदाश्रयो यथाः तीरादिः, तत्सम्बन्धी शक्यार्थो जलप्रवाहादिस्तद्वाचकत्वं गङ्गापदे। एवमेव स्ववाच्यसम्बन्धिवृत्तित्वेन चेयम् अर्थाश्रया। तथा च स्वं स्वीयं गङ्गादिलाक्षणिकं पदं तद् वाच्यो जलप्रवाहविशेषतत्सम्बन्धी तीरादिस्तद् वृत्तित्वं सामीप्यादिसम्बन्ध-रूपलक्षणायामितीत्थं पदपदार्थयोः सम्बन्धत्वं प्रतिपादयन्ति। अतोऽत्रान्वयानुपपत्त्या लक्षणा जायते। परञ्च सर्वत्रान्वयानुपपत्तिः न लक्षणाबीजम्। यतो हि ''यष्टीः प्रवेशय'' इत्यत्र यष्टीनां प्रवेशान्वयसम्भवेऽपि भोजनप्रवेशेऽन्वयानुपपत्त्यभावात्। यष्टिपदस्य यष्टिधरे लक्षणा न स्यात् अपितु भोजनतात्पर्यानुपपत्त्या यष्टिपदस्य यष्टिधरे लक्षणा अतः अन्वयानुपपत्तिर्न लक्षणा बीजम् किन्तु वक्तृतात्पर्यानुपपत्तिरेव लक्षणाविषय एवं ''काकेभ्यो दधि रक्ष्यताम्'' इत्यत्र काकेभ्यो दधिरक्षणसम्भवेनान्वयो भवितुमर्हति परञ्चात्र सर्वेभ्यो दध्युपघातकेभ्यो विडालादिभ्यो रक्षणे तात्पर्यमतोऽत्रापि तात्पर्यानुप-पत्तिर्लक्षणाबीजं मन्यते। यथोक्तम् -

**लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः।।**

''गंगायां घोषः'' इत्यादौ गंगापदस्य शक्यार्थे प्रवाहरूपे घोषस्या-न्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः सा च शक्यसम्बन्धरूपा। तथाहि प्रवाहरूपशक्यार्थसम्बद्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणं ततः शाब्दबोधः। परन्तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात् - यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभावात्। तेन यष्टिप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा। एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात्।

**लक्षणाभेदनिरूपणम्-** शक्यपरम्परासम्बन्धरूपा लक्षणा द्विविधा गौणी शुद्धा च।

उक्तं मञ्जूषायाम् - ''सा द्विविधा, गौणी शुद्धा च।

**प्रथमभेदं गौणी** – गुणाद् आगता गौणी इति। ''स्वनिरूपित-सादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी'' अर्थात् स्वं लाक्षणिकत्वेनाभिमतं पदं तेन निरूपितं निर्दिष्टं यत् सादृश्याधिकरणत्वं सादृश्यस्य गुणसाम्यस्य यद् अधिकरणत्वमाधारत्वं तस्य सम्बन्धस्तेन शक्यसम्बन्धी वाच्यार्थसम्बद्धो योऽर्थस्तस्य प्रतिपादिका बोधयित्री गौणी (गौण्याख्यभेदः)। गुणसादृश्यसम्बन्धेन यः शक्यार्थसम्बन्धस्तस्य प्रतिपादिका गौणीत्याशयः। यथा ''सिंहो माणवकः'' अत्र हि सिंहपदस्य शक्यार्थो मृगेन्द्रः। अत्र स्वपदेन सिंहपदमेवाभिप्रेतम्। सिंहे ये हि शौर्यादयो गुणा विद्यन्ते तत्सदृशा एव शौर्यादये गुणा माणवकोऽपि सन्ति। अतोऽत्र माणवके सिंहनिरूपितसादृश्यमस्ति। तत्सादृश्यस्याधिकरणं माणवकः। अतः एतादृशसादृश्याधिकरणत्वरूप सम्बन्धेन माणवकस्यार्थबोधो लक्षणयैव भवति। सैषा गुणसादृश्याश्रितत्वेन गौणीत्युच्यते। उक्तमेव ''सादृश्यात्तु मता गौणी'' लक्ष्यमाणगुणैर्योगाद् वृत्तिरिष्टा तु गौणता' अत्र केचित् स्वार्थसहचारिणो गुणाः शौर्यादयो लक्षणया लक्ष्यमाणाः अपि सिंहशब्दस्य माणवकार्थाभिधाने प्रवृत्तिनिमित्तमुपयान्ति अर्थात् सिंहशब्दस्य शक्त्यासिंहत्वं प्रवृत्तिनिमित्तम्। तेन सिंहशब्दात्प्रथमं लक्षणया सिंहगतशौर्यादि गुणोपस्थितिस्ततोऽभिधया तस्मान्माणवक बोध इति वदन्ति। परे तु तन्न मन्यन्ते। तन्मते स्वार्थसहचारिगुणाभेदेन सिंहगता गुणा एव लक्ष्यन्ते न तु सिंहपदान्माणवकार्थोऽभिधीयत इति। परे तु साधारणगुणाश्रयत्वेन सिंहपदान्माणवकार्थ एव लक्ष्यते इति। तेन शौर्यादिगुणविशिष्टे लक्षणा भवतीति तन्मतम्। अतो न सामानाधिकरण्यानुपपत्तिरिति।

**द्वितीयभेदं शुद्धा -**'तदतिरिक्तसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका शुद्धा। अर्थात् तस्मात् सादृश्ययाद् अतिरिक्तौ भिन्नो यः सम्बन्धः सामीप्यादिस्तेन शक्यसम्बन्धी वाच्यसम्बद्धो योऽर्थस्तस्य प्रतिपादिका बोधयित्री शुद्धा। शुद्धायां कार्यकारण भावादिसम्बन्धोऽपेक्षितो भवति। उपचारामिश्रणादेषा शुद्धेति। यथा 'आयुर्घृतम्' इत्यत्र घृतस्यायुर्वृद्धि-कारणत्वेन कार्यकारणभावसमबन्धमाश्रित्य घृतशब्दस्तत् सम्बद्धायुषं लक्षणया बोधयति।

**उक्तं यथा कलाटीकायाम् -**मन्तान्तरासाङ्गत्यध्वनाय प्राग्वद्विभज्यते- गौणीशुद्धा च। यत्तु गौणी न लक्षणान्तर्गताविशिष्टबुद्धियोग्यसम्बन्धे सत्येव लक्षणाप्रवृत्तेः न हि संयोगेन 'दण्डी चैत्र' इतिवत्सादृश्येन सिंहवान् चैत्र इति भवतीति मीमांसकाः। तत्र विशिष्टबुद्धययोग्यत्वेऽपि विपरीतलक्षणा-स्थले स्वनिरूपितविरोधाधिकरणत्व सम्बन्धेऽप्यस्याः सत्त्वात्।

**उक्तं यथा रत्नप्रभायाम्-** लक्षणास्वरूपसम्बन्धस्य द्विधा विभजते गौणीशुद्धा च। गौणी इति- ''सादृश्यसम्बन्धेन य: शक्यसम्बन्धस्तत्प्रतिपा-दिका गौणीत्यर्थ:। यत्तु गौणी न लक्षणाभेदरूपा विशिष्टबुद्धियोग्य-सम्बन्धे सत्यैव लक्षणास्वीकारात्। न हि संयोगेन 'दण्डी चैत्र:' इति वत् सादृश्य सम्बन्धेन 'सिंहवान् चैत्र:' इति विशिष्टबुद्धिर्दृश्यते इति मीमांसका:, तन्न, विशिष्टबुद्ध्ययोग्यत्वेऽपि 'उपकृतम्' इत्यादौ विपरीतलक्षणास्थले स्वनिरूपितविरोधाधिकरणत्व सम्बन्धेऽप्यस्या: सर्वसम्मतत्त्वादिति। शुद्धा सादृश्यातिरिक्तसम्बन्धेनेत्यर्थ:।

**उभयो: टीकयो: साम्यं वैषम्यं निष्कर्षश्च :-** उभयो: टीकयो: लक्षणाभेदत्वेन गौणी न स्वीक्रियते। उक्तं कलायाम् - गौणी न लक्षणान्तर्गता विशिष्टबुद्धियोग्यसम्बन्धे सत्येव लक्षणाप्रवृत्ते: तथा च रत्नप्रभायाम्- न हि संयोगेन दण्डी चै: इतिवत् सादृश्यसम्बन्धेन सिंहवान् चैत्र:' इति विशिष्टबुद्धिर्दश्यत इति मीमांसका:।

**निष्कर्ष: -** लक्षणे निरूपितेऽपि भेदनिरूपणं विना लक्षणाख्यसम्बन्धविमर्शो न परिपूर्णतां यास्यतीति लक्षणाभेदो विमृश्यते। अनुपदमेवोक्तलक्षण-लक्षिता लक्षणा द्विविधा गौणी, शुद्धा चेति।

**अजहत्स्वार्था जहत्स्वार्था च लक्षणाभेद:-** गौणशुद्धभेदवत्या लक्षणाया: पुनर्भेदान्तरमाहु:- सा द्विविधा अत्रहत्स्वार्था जहत्स्वार्था च।

**प्रथमभेदं अजहत्स्वार्था-** ''अजहत् अत्यजन् स्वार्थ: मुख्यार्थ: यां सा अजहतस्वर्था'' इति। नागेशभट्टेन महाभाष्यस्य उद्घोतटीकायाम् 'जहति परित्यजन्ति स्वानि पदानि यम् (अर्थम्) स जहत्स्वोऽर्थो:। जहत्स्वोऽर्थो यस्या: लक्षणाया: सा जहत् स्वार्था:। न जहत्स्वार्था अजहत्स्वार्था। अर्थात् यत्र पदानि स्वमर्थं न जहति सा न जहति स्वमर्थं येति विग्रहात्। उक्तं लघुमञ्जूषायाम् - ''शक्यार्थापरित्यागेनेतरार्थलक्षणमाद्या। तदपरि-त्यागश्च शक्यार्थस्य येन केनापि रूपेण लक्ष्यार्थान्वयिनाऽन्वयित्वम्'' यथा- 'छत्रिणोयान्ति' 'कुन्तान्प्रवेशय' 'काकेभ्यो दधि रक्ष्यताम्।'

उक्तं परमलघुमञ्जूषायां नागेशेन -''स्वार्थसंवलितपरार्थाभिधायिका अजहत्स्वार्था''। अर्थात् स्वार्थेन स्वशक्यार्थेन संवलितो मिश्रितो य: परार्थ: अन्यपदार्थस्तस्याभिधायिका बोधयित्री या सा अजहत्स्वार्था।

आचार्यविश्वनाथ: अस्य लक्षणायां उपादान लक्षणा मन्यते -

**उक्तं यथा साहित्यदर्पणे**

**मुख्यार्थस्येतराक्षेपो वाक्यार्थऽन्वयसिद्धये।**
**स्याद् आत्मनोऽप्यूपादानाद् एषोपादानलक्षणा।।**

अर्थात् मुख्याऽर्थस्य वाक्याऽर्थे अन्वयसिद्धये आत्मन: अपि उपादानात् एषा उपादानलक्षणा इति।

यथा- 'छत्रिणो यान्ति' छत्रिण: छत्रावृता: छत्रयुक्ता वा यान्ति गच्छन्ति इत्यत्र। 'कुन्तान् प्रवेशय' कुन्तान् अस्त्र विशेषता प्रवेश आभ्यन्तरमानय इत्यत्र। 'यष्टी: प्रवेशय' यष्टी: दण्डान् प्रवेशय अन्तरानय।

'काकेभ्यो दधि रक्ष्यताम्' 'काकेभ्य: सर्वेभ्य: काकेभ्य: दधि रक्ष्यताम् इत्यत्र च।

अत: अच्छत्र्यादिसाधारणरूपेण छत्र्यादे:, कुन्तवद्विशेषणतया कुन्तायां दध्युपघातकतया काकादेश्च लक्ष्यार्थान्वयिक्रियाविशेषणत्वात् इति।

**उक्तं यथा कलाटीकायाम् -** लक्षणमित्यत्र करणे ल्युट्। सामान्ये नपुंसकम्।

**उक्तं यथा रत्नप्रभायाम्-** जहति स्वानि (पदानि) यम् (अर्थम्) स जहत्स्वोऽर्थ, जहत्स्व (पदकर्तृकत्यागकर्मीभूत:) अर्थो यस्यां लक्षणायां सा जहत्स्वार्था, जहत्स्वार्था न भवतीत्यजहत्स्वार्था। शक्यार्थापरित्यागश्चेत्यर्थ:। शक्यलक्ष्योभयसाधारणरूपेण लक्ष्यार्थान्वयिना शक्यार्थान्वयित्वस्यैव 'अत्याग' पदार्थत्वेनेत्यर्थ:।

यथा - छत्रिणो यान्ति - अत्रैकसार्थवाहित्वेन रूपेणाच्छत्रिणामिव छत्रिणामपि गमनेऽन्वय:। अत्र शुद्धा।

कुन्तान् प्रवेशय - कुन्तिनि पुरुषे संयोगेन कुन्तो विशेषणम् तथा च कुन्तिनामिव कुन्तानामपि प्रवेशक्रियायामन्वय इति तत्राप्यजहत्स्वार्थे वेति भाव:।

काकेभ्यो दधि रक्ष्यताम् -

अत्र 'काक' पदस्य दध्युपघातके लक्षणया लक्ष्यताऽवच्छेदकदध्युपघातकरूपेण काकस्यापि क्रियायामन्वयादजहत्स्वार्थैवेति भाव:। इयं गौणी, लक्ष्यार्थस्य विडालादे: सादृश्यसम्बन्धेन शक्यार्थसम्बद्धत्वात्।

**अत्र निष्कर्ष:-** यत्र शक्यार्थलक्ष्यार्थयोरुभयो: क्रियायामन्वयो भवति साऽजहत्स्वार्था। 'स्वसिद्धये पराक्षेप:' इत्यालङ्कारिका:। अत: 'कुन्तान् प्रवेशय' इत्यादिषु उदाहरणेषु क्रियायामन्वयो भवति, अत: अजहत्स्वार्था लक्षणा वर्तते।

**द्वितीयभेदं जहत्स्वार्थालक्षणा-** जहति स्वार्थं पदानि यस्यां सा जहत्स्वार्थ। अथवा जहति स्वानि पदानि यमर्थं स जहत्स्व:, तादृशोऽर्थो यस्यां सा इति द्विविधेऽपि विग्रहे समानाधिकरणोबहुव्रीहिरेव स्थित:। पूर्वत्र विग्रहे तु वैयधिकरण्येनान्वयमादाय बहुव्रीहि: स्वीकृत: निरूढायां लक्षणायां प्रयोजनस्य चर्चा न विधीयते। किन्तु मुख्यार्थबाधो भवत्येव। यतो हि मुख्यार्थबाधे तद्योगे ज्ञाने भवति लक्षणा इति।

**उक्तं यथा लघुमञ्जूषायां -** ''स्वार्थपरित्यागेनेतरार्थाभिधायिकाऽन्त्या।'' तत्परित्यागश्च शक्यार्थस्य लक्ष्यार्थान्वयिनाऽनन्वयित्वम्। अत: 'गां वाहीकं पश्य' इत्यादौ न दोष:। अत्र गोसदृशे लक्षणायामपि न गोस्तदन्वयिदर्शनक्रियान्वयित्वम्।

**अयमाशय: -** स्वशक्यार्थस्य परित्याग उपेक्षा, तेन, इतरो ऽपर एव किन्तु सम्बद्धो योऽर्थस्तस्य अभिधायिका बोधयित्री। तस्य स्वार्थस्य परित्याग शक्यार्थस्य लक्ष्यार्थस्य येन अर्थेन सहान्वयो योगस्तेन सह अनन्वयित्वम्। अर्थात् द्वयो: क्रियामेकत्रान्वयाभाव इति। यथा गां वाहीकं पश्य इत्यादौ गोसदृशे लक्षणायां गोर्विशेषणत्वेऽपि दर्शन-क्रियायामन्वयाभाव:। अत्र लक्षणसमन्वयश्च स्वमते आरोपितस्य गोत्वस्यान्वयिताव-च्छेदकत्वेऽपि वास्तविकगोत्वस्य तदभावेनावगन्तव्य:।

अत्र प्रत्येकं जातीनां व्यापकत्वेऽपि यत्र तस्या अभिव्यक्ति: तत्रैव सा कार्यसाधिका इति सिद्धान्तमनुरुध्य 'वाहीके गोत्वारोपेऽपि तस्य अभिव्यक्तभावेन नान्वयसाधकत्वमिति स्वार्थत्यागोऽस्त्येव' इति समाहितवन्त: कुञ्जिकाकारा:।

**अत्र परमलघुमञ्जूषायाम् -** 'गां वाहीकं पाठय' इत्यादौ गोसदृशलक्षणायामपि न गोस्तदन्वयिपाठन-क्रियान्वयित्वम्।'' अर्थात् वाहिकस्य गोगतजडत्वमान्द्यादिगुणसादृश्येऽर्थे लक्षणायामपि। गोशब्दस्य न तेन वाही तेन सह अन्वयिनी या पाठनक्रिया तस्या अन्वयित्वमनुसारित्वमिति। न हि गौ: पाठ्यतेऽपिन्तु गोसदृश जडबुद्धिर्वाहीक एवेत्यन्वयाभाव उक्त:। अत एवोक्तमारोपित गोत्वस्यान्वयित्वेऽपि वास्तविकस्यानन्वया-दनन्वयित्वमुक्तं शक्यस्य। 'परार्थेस्वसमर्पणम्' इति जहत्स्वार्थालक्षणम्।

रत्नप्रभाकृतस्तु -

जहत्स्वार्था - स्वार्थपरित्यागेन इति। 'गां वाहीकं पश्य' इत्यादौ गोसदृशे लक्षणायां गोर्विशेषणत्वेऽपि न गोर्दर्शन क्रियायामन्वय:।

**निष्कर्ष:** उपर्युक्तस्य समग्रवलोकेन स्पष्टं जायते यत् ''स्वार्थपरित्यागेनेतरार्थाभिधायिका सा जहत्स्वार्था इति।'' प्रकारान्तरेण पुनरपि लक्षणा निरूढाप्रयोजनवतीति भेदाभ्यां द्विविधा। पुनश्च लक्षणा द्विविधोक्ता - निरूढा प्रयोजनवती चेति। उक्तं यथा परमलघुमञ्जूषायां प्रकारान्तरेण पुनर्लक्षणा द्विविधा। तथाहि- ''प्रयोजनवती रूढा च लक्षणा द्विविधा मत'' इति।

**प्रथमभेदं - निरूढलक्षणा -** ''असति प्रयोजने शक्यार्थबाधप्रतिसन्धानपूर्वकं तत्सम्बन्ध्यपरार्थबोधे निरूढलक्षणेति व्यवहार:, अन्यथा रूढिशक्तिरेवेति बोध्यम्। यथा 'त्वचा ज्ञातम्' इत्यादौ त्वगिन्द्रिये निरूढलक्षणा।

**उक्तं परमलघुमञ्जूषायां -** 'असति प्रयोजने शक्यसम्बन्धो निरूढलक्षणा। 'त्वचा ज्ञातम्' इत्यादौ यथा त्वचस्त्वगिन्द्रिये। इयं तु शक्यपरपर्यायैवेति बोध्यम्।

**अयमाशय:-** प्रयोजनं विनैव परम्परावशात्तथा प्रयुक्ता सा निरूढलक्षणा। यथा 'त्वचा ज्ञातम्' इत्यत्र त्वचस्त्वगिन्द्रिये लक्षणा तस्यं चैतन्याभावेन ज्ञानक्रिययाऽन्वयाभावत्। वैयाकरणमते तु निरूढलक्षणाशक्तेरेव नामान्तरमात्रम्, न तु तद्भिलक्षणा। यथा हि शक्तिरनादितात्पर्यवशात् कमप्यर्थं बोधयति तथैव निरूढलक्षणाऽपि अनादितात्प-र्यवशादेव तत्तदर्थान् प्रकटयति। यथा हि 'त्वक्' शब्द: चर्मणि अर्थे प्रसिद्धस्तथैव त्वगिन्द्रियेऽपि। तेनैषा शक्ते: पर्यायैव।

**कलाटीकायाम् -** ''त्वचा ज्ञातम्'' इयं शुद्धा जहत्स्वार्था। ननु रूढि: प्रसिद्धिस्तथा चैषामर्थानां प्रसिद्धत्वेन तत्र शक्तिरेवास्तु अश्वगन्धादिपदानाभिवौषधि विशेषादावत आह- असतीति। इदञ्च प्रयोजनवत्यति प्रसङ्ग निराकरणम्- एतेन यदि कुशलादिपदे शुक्लादिपदे च तत्पूर्वकं दक्षादेर्गुणिनश्च बोध: प्रामाणिकानुभवसिद्धस्तदा लक्षणा। विवेचकत्वरूपं सादृश्यम्। विवेचकत्वं च सतो ग्रहणमसत: परित्यागरूपं कुशग्राहिणि दक्षे च वर्तते। तत्राप्याद्ये जहत्स्वार्था, अन्त्येऽजहत्स्वार्था। अन्यथा रूढिशक्तिरेवेति सूचितम्।

**रत्नप्रभायाम् -** भेदविषये उक्त: रूढिमतीत्वप्रयोजनवतीत्वविशिष्टोपादानात्व लक्षणलक्षणात्वादय इत्यर्थ:। यथा ''त्वचा ज्ञातम्'' इयं शुद्धा जहत्स्वार्था।

ननु रूढि: (प्रसिद्धि:) तया बोधकानामश्वगन्धादिपदानामोषधि विशेष इवार्थविशेषे त्वगादिपदानामपि शक्तिरस्तु यदर्थविषयक बोधजनकत्वं यत्र प्रसिद्धम् तत्र तन्निरूपितशक्तिरितिनियमादत रूढिस्थले किञ्चित् प्रयोजनं नास्ति इति भाव:। त्वगिन्द्रिये रूढिलक्षणाक्रान्तत्वाद् रूढिरेवेति भाव:। अन्यथा विषये -एतेन कुशलादिपदे यद्यवयवार्थबाधप्रतिसन्धानपूर्वकं दक्षादेर्बोध: प्रामाणिकानुभवसिद्धस्तदा लक्षणा। सतोग्रहणमसत: परित्यागरूपञ्च सादृश्यं कुशग्राहिणि वर्तते। तत्राप्याद्ये जहत्स्वार्थो, अन्त्येऽजहत्स्वार्था, अन्यथा रूढि शक्तिरेवेति सूचितम्।

**अत्र टीकयो: साम्यं वैषम्यं च -** अत्र साम्यं वर्तते। उभयो टीकयो 'त्वचा ज्ञातम्' इत्यादौ शुद्धा जहत्स्वार्था लक्षणा मन्यते।

**प्रयोजनवती लक्षणा-** यत्र किञ्चित् प्रयोजनं वर्तते तत्र प्रयोजनवती लक्षणा। इति।

यदुद्दिश्य सत्यपि वाचकशब्दे लक्षणा समुपास्यते तत्प्रयोजनं तदस्त्यस्यामिति प्रयोजनसहिता। अर्थात् मञ्जूषायां - ''कुन्ता: प्रविशन्ति'' इत्यत्रभीतिपलायमान वाक्ये कुन्तानां तात्पर्यविषयक-कुन्तिप्रवेशेऽन्वयबाधात्कुन्तपदस्य तत्संयुक्तपुरुषे लक्षणा, कुन्तगत-तैक्ष्ण्य प्रतीति: प्रयोजनम्।

**उक्तं यथाकलाटीकायाम् -**

कुन्ता: प्रविशन्ति इत्यत्र - कुशे: कलत्रित्यादिना तत्साधनाश्चेति बोध्यम्। प्रविश-न्तीति पूर्वान्ययि। कुन्तगतेति। लक्ष्येष्वित्यादि:। इयं शुद्धाऽजहत्स्वार्था, पुरुषविशेषणतया कुन्तानां प्रवेशान्वयात्।

**रत्नप्रभायाम् -** ''कुन्ता प्रविशन्ति' इत्यत्र तात्पर्यविषयकुन्तिप्रवेशे कुन्तानामन्वयबाधा-दित्यन्वय:। इयं शुद्धाऽजहत्स्वार्था, पुरुषविशेषणतया कुन्तानां प्रवेशक्रियायामन्वयात्। यत्तु मुख्यापि विशेषणिका लक्षणा - अजहत्स्वार्था सा च गौण्यपीति तन्न, 'चित्रगु:' इत्यादावप्यजहत्स्वार्थात्वापत्ते:, काकेभ्यो दधि रक्ष्यताम्' इत्यादौ मुख्यार्थस्य विशेषण-त्वाभावेनासंग्रहापत्तेश्च। यदा यत् किञ्चिद् गोसदृशसत्त्वेन गोर्वाहीक समुदायबोधनेच्छया 'गाव एते यान्ति' इति प्रयुज्यते तदा गौण्या अप्यजहत्स्वार्थात्वं दुर्वारमेवेति नव्या:।

**निष्कर्ष:-** उभयो टीकयो: 'कुन्ता प्रविशन्ति' इत्यत्र 'शुद्धाऽजहत्स्वार्था' स्वीकृता। कुन्तेन विशिष्ट: सुसज्जितो य: पुरुषो वीरस्तस्मिन्। कुन्तगतं यत् तैक्ष्णयं तीव्रता तस्य प्रतीति: प्रत्यय:, अत: अत्र प्रयोजनवती लक्षणा वर्तते।

**2. 'गङ्गायां घोष:'**

इत्यत्र प्रवाहे घोषाधिकरणत्वबाधात् गङ्गापदेन स्वसम्बन्धि तीरं लक्ष्यते' गङ्गागतशैत्यपावनत्वप्रतीति: प्रयोजनम्। अर्थात् 'गङ्गायां घोष' इति वाक्ये तीरवाचक शब्दे सत्यपि गङ्गापदे या लक्षणा क्रियते तस्या: तटे। गङ्गागतं गङ्गासम्बद्धं यत् शैत्यपावनत्वं शैत्यं शीतलता पावनत्वं पवित्रता च आदिपदात्पापनाशनादिकग्रहणं तेषां प्रतीति: अवभासनम् प्रयोजनम्। सत्यपि तीरस्य वाचके शब्दे तदुपेक्ष्य गङ्गापदे लक्षणायास्तटे गङ्गासम्बद्धशीतलता पावनतादि प्रतीतये एव।

इदमेव तत्र लक्षणाया: प्रयोजनम्। तच्च व्यञ्जनया बोध्यते इत्यन्यत्र विस्तर:। अत्र सामीप्यं लक्ष्यतावच्छेदकम्।

**उक्तं यथा कलाटीकायाम् -**

'गङ्गयां घोष:' इत्यत्र शुद्धां जहत्स्वार्था मन्यते। अत्र प्रवाहस्य तदन्वय्यनन्वयित्वात्तत्वम्। अत्र तीरत्वेनैव गङ्गासम्बन्धितीररूपतीरविशेषस्यानयो-पस्थितिरिति बोध्यम्।

**रत्नप्रभाकृतस्तु -**

'गङ्गायां घोष:' इत्यत्र लक्ष्यार्थबोधानन्तरं व्यङ्ग्यार्थबोधात्प्रागित्यर्थ:। अभेदाध्यवसायादेव गङ्गागतशैत्यादेस्तत्र प्रतीतिरित्यर्थ:। एवमेव 'उपकृतम्' इत्यत्र वैपरीत्यसम्बन्धेन लक्ष्येऽपकारे लक्ष्यार्थबोधानन्तरमसाधुत्वरूपव्यङ्ग्यार्थबोधात्प्रागभेद-प्रतीतिद्वारा व्यङ्ग्यार्थबोध इत्याह-

**''उपकृतं बहु तत्र किमुच्यते, सुजनता प्रथिता भवता परम्।**
**विदधदीदृशमेव सदा सखे! सुखितमास्स्व तत: शरदां शतम्।।**

अर्थात् अत्र अपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति। अपकृतं दुर्जनता शस्त्रो दु:खितं शरदां वर्षाणामिति बोध्यम्। एवेन साक्षात्त्वव्यवच्छेद:। साधुत्वं तत्प्रतीति:। अन्यथा तस्मादव्यङ्गयतापत्तिरिति भाव:।

**निष्कर्ष:-**

अत्र उभयो: टीकयो: साम्यं वर्तते- 'गङ्गायां घोष:' इत्यत्र शुद्धां जहत्स्वार्था स्वीकृता। गङ्गापदे तीरलक्षणा तीरे गङ्गापदे तीरलक्षणा तीरे गङ्गागत शैत्यपावनत्वादिप्रतीतये एव। न च तत्प्रतीति: केवलात्तीरपदादवगम्यते तीरमात्रे तदभावात्। 'गङ्गातटे घोष:' इति कथनेऽपि न प्रयोजनसिद्धि: गङ्गाया: सुदुरवर्तिनि तटे शैत्यपावनत्वाद्यभावात्।

गङ्गापदस्य प्रवाहरूपमर्थमभिधाय निवृत्तायां शक्तौ तस्य घोषेऽन्वयाभावेन तात्पर्यानुपपत्त्या वा तटमर्थं लक्षयित्वा लक्षणाऽपि निवर्तते। ततश्च व्यञ्जनया शैत्यपावनत्वादिप्रयोजनं व्यञ्जते। न च पुन: शक्त्या तत्क्रियते सङ्केताभावात्। न च पुनर्लक्षणा प्रवर्तते मुख्यार्थबाधादि हेत्वभावात्। न च लक्ष्यार्थो मुख्यो न च तस्य बाध: न च प्रयोजनस्य प्रयोजनं सम्भवति। तेन यन्निमित्तमुपादाय लक्षणा समुपास्यते तद्धि व्यञ्जनयैव व्यज्यते न तु शक्त्या लक्षणया वेति दिक्।

**3. गौर्वाहीक: -**

इत्यत्र गोसादृश्यं लक्ष्यतावच्छेदकं; गवाभेदप्रत्यय: फलम्, व्यञ्जनाजन्यबोधेबाधज्ञानस्याप्रतिबन्धकत्वात्। एष चाहार्य:। शब्दजन्यभेदकधर्मोप-स्थितिकालिकत्वात्।

**उक्तं यथा परमलघुमञ्जूषायाम् -**

गौर्वाहीक: इत्यत्र सादृश्यं लक्ष्यतावच्छेदकं गवाभेदप्रत्यय: प्रयोजनम्। अयमाशय - गोवाहीकयो: समानजाड्यमाद्यादिधर्मवत्त्वं, लक्ष्यताया लक्षणाविषयस्य अवच्छेदकनिरूपकं गोरभिन्नत्वेन प्रतीति: प्रयोजनम्।

'गौर्वाहीक:' इत्यत्र गोपदस्य वाहीकपदेनान्वयाभावात् उभयोर्जाड्यमान्द्यादिध-र्मसादृश्येन लक्षणा भवति, यस्या: प्रयोजनं वाहीकस्य गवाभेदप्रत्यय एवेति।

**कलाटीकायाम् -**

'गौर्वाहीक:' इत्यत्र प्रयोजनवतीं गौणी जहत्स्वार्थामुदाहरणम्। वाहीके गोत्वबाधात् गोपदेन गोसदृशलक्षणादिति भाव:। सादृश्यमहिम्रा भिन्नधर्मप्रकार-कोप:स्थितावपि गोपदशक्याभेदप्रतीतिर्व्यञ्जनया वाहीके। बाधितार्थबोधकतयैव तस्या धर्मिग्राहकमानसिद्धत्वादिति भाव:।

**अत्र कुञ्जिकाकृतस्तु -** 'गौर्वाहीक:' इत्यत्र जहत्स्वार्था गोवाहीकोभय तात्पर्यके 'एते गाव आनीयन्ताम्' इत्यादावजहत्स्वार्थेति चेत्सत्यम्। अत्र सम्बन्ध: सादृश्यमन्यो वा।

**उक्तं यथा रत्नप्रभायाम्**

'गोर्वाहीक:' इत्यत्र एतदेवाभिप्रेत्य प्रयोजनवतीं जहत्स्वार्थां गोणी मन्यते। अत्र वाहीके सादृश्यमहिम्ना भिन्नधर्मप्रकारकोपस्थितावप्यभेदप्रतीतिर्व्यञ्जनया। निश्चयात्मक-बाधज्ञानमेव प्रतिबन्धकं बाधसंशयानन्तरमपि विशेषधर्मदर्शन तद्वत्ताबुद्धेरनुभवसिद्धत्वात् तदाह - आहार्य इति। आहार्य- स्वविरूद्धधर्मधर्मिताऽवच्छेदककस्वप्रकारकेच्छाजन्यं ज्ञानमाहार्यमित्युच्यते। यथा 'गोर्वाहीक:' इत्यत्र 'गोत्वाभाववान् वाहीको गोत्ववान्' इत्याकारकमाहार्यज्ञानम्। गोत्वम्, तद्विरुद्धोधर्म: गोत्वाभव:, तदवच्छिन्ना धर्मिता गोत्वनिष्ठ-प्रकारतानिरूपिता। वाहीकनिष्ठा इतीच्छाजन्याहार्यज्ञानत्वं सुलभम्।

वाहीकशब्दजन्या या वाहीकत्वरूपभेदकधर्मविषयिकोपस्थितिस्तत्कालिक-त्वादित्यर्थ:। एतेन बाधसमकालिकत्वं दर्शितम् इति।

**निष्कर्ष: -**

उभयो: टीकयो: 'गोर्वाहीक:' इत्यत्र प्रयोजनवती गोणी जहत्स्वार्था स्वीकृता। गौर्वाहीक: इत्यत्र वाहीके गवाभेदेन जाड्यमान्द्यातिशयप्रतीतिर्लक्षणाया: प्रयोजनम्। टीकयो: अभेदज्ञानविषये व्यञ्जनावृत्तिं मन्यते। व्यञ्जनया जन्यज्ञाने बाधनिश्चयप्रति-बन्धकोऽभाव:। य: अभेदज्ञानम् आहर्य वर्तते।

**अत्र रत्नप्रभाकृतस्तु: -**

'स्वविरुद्धधर्मधर्मिताऽवच्छेदककस्वप्रकारकेच्छाजन्यं ज्ञानमाहार्यमित्युच्यते अत: गोभेदवान् वाहीकगवाभेदवान्, अस्मिन् प्रकारस्य ज्ञानं बाधज्ञानसमकालिकेच्छाजन्यं वर्तते अत: आहार्यमस्ति। उक्तं च बाधज्ञानसमकालिकेच्छाजन्यज्ञानं आहार्य कथ्यते।

**अतैव शङ्कते -**

गवाभिन्नो वाहीक इति बोधे अभेदस्य बाधितत्वाद्गोशब्देन गोसदृशं लक्ष्यम्। गोसादृश्यं च गोगत जाड्यमान्द्यादि। तथा च जडाभिन्नो वाहीक इति बोध इति।

**शङ्कायां समाधानं सञ्जायते -**

'गौर्वाहीक:' इत्यादौ गोशब्देन स्वशक्यगत जाड्यादिगुणसदृश-जाड्यादय एव लक्ष्यन्ते, तैश्चजाति शक्तिनये व्यक्तिलाभवत्स्वाश्रयव्यक्तिलाभ इति परास्तमित्याहु:।

**जहदजहल्लक्षणा -**

लक्षणायास्तृतीयमपि भेदं निरूपयति प्राचां मतनुसृत्य -

जहति अजहति च पदानि स्ववाच्यार्थं यस्यां सा जहति अजहति च स्वानि यं स: तादृशोऽर्थो यस्यां सा वा तादृशी या लक्षणा सा जहदजहल्लक्षणा इति।

**उक्तं यथा परमलघुमञ्जूषायां -**

विशिष्टार्थबोधकशब्दस्य पदार्थैकदेशे लक्षणायां जहदजहल्ल-क्षणेति व्यवहरन्ति वृद्धा:। ''वाच्यार्थे किञ्चिदंशत्याग: कञ्चिदंशपरिग्रहश्च। अत्र ग्रामैक देशे पटैकदेशे च दग्धे 'ग्रामोदग्ध:' 'पटो दग्ध:' इति व्यवहार:। 'तत्त्वमसि' इत्यत्र सर्वज्ञत्वाल्पज्ञत्वयोस्त्याग:, शुद्धचैतन्ययोरभेदान्वय:।

**लघुमञ्जूषायां -**

''ग्रामो दग्ध:'' 'पुष्पितं वनम्' इत्यादौ 'दग्धादिपदान्यर्श- आद्यजन्तानि' इत्यर्थवत्सूत्रभाष्योक्ते:, तत्र लक्षणैव नेति बोध्यम्। ईदृशेषु जहदजहल्लक्षणेत्यन्ये।

**अयमाशय:**

केचित्प्राञ्चो विशेषेण वेदान्तिन: खलु लक्षणायां जहदजहत्स्वा-र्थाख्यं तृतीयमपि भेदं समर्थयन्ति। तदनुसारेण तत्त्वमसि इति महावाक्ये तत्पदस्य ब्रह्मगत-सर्वज्ञत्वचैतन्यरूप: शक्यार्थ: त्वमिति पदस्य जीवगताल्पज्ञत्वचैतन्यरूप: शक्यार्थ:।

तत्र अर्थैकदेशभूतयो: सर्वज्ञत्वाल्पज्ञत्वयोस्त्याग: उभयगतशुद्ध-चैतन्ययो: जीवब्रह्मणोर्ग्रहणम्। एवमेव पटैकदेशे दग्धे पटो दग्ध:, ग्रामैकदेशे दग्धे ग्रामो दग्ध इति व्यवहार:। तत्र उभयत्र अग्निसाद्भूतभागस्य ग्रहणमवशिष्टभागस्य त्याग इति। इयमेव भागलक्षणा इत्यप्युच्यते। अन्ये त्वेतादृशस्थले लक्षणां न मन्यन्ते। यथा हि 'घटोऽनित्य' इत्यत्र अनित्यत्वस्य घटवाच्यार्थैकदेशघटत्वेन सहान्वयाभावेऽपि विशेष्यभूतघटव्यक्तौ अन्वयस्तथैव तत्त्वमसि इत्यत्र विशिष्टचैतन्ययोरभेदान्वयाभावेऽपि शक्यार्थभूत-विशेष्यरूपचैतन्ययो: परस्परमन्वय:। अतो नायं लक्षणाया विषय इति। महाभाष्यकृदपि ''समुदायेषु प्रवृत्ता: शब्दा अवयवेष्वपि वर्तन्ते। पूर्वे पंचाला:, उत्तरे पंचाला:, तैलं भुक्ताम्। घृतं भुक्तम् शुक्लो नील: कपिल: कृष्ण: इति।।

इति नैतादृशस्थले लक्षणामनुमन्यते। तदनुसारेण 'ग्रामो दग्ध:' इत्यत्र दग्धपदे दग्धोऽस्यास्तीति अर्शआदित्वादचं मत्वा दग्धभागसंहितो ग्राम इत्यर्थ इति। अन्ये तु 'तत्त्वमसि' इत्यत्र जहदजहल्लक्षणाया: सत्त्वेऽपि 'ग्रामो दग्ध' इत्यादौ जहल्लक्षणैव निर्वाह:, स्वैकदेशत्यागेऽपि स्वार्थत्यागस्य सत्त्वात्। अजहल्लक्षणया तु न निर्वाहो नञ: प्रतियोगितावच्छेदकावच्छिन्नाभावबोधकत्त्वादिति।

**अत्र कलाकृतस्तु -**

'जहदजहल्लक्षणा' इति तृतीयो भेद:। 'ग्रामो दग्ध:' अत्र ग्रामादिपदस्य स्वार्थैकदेशं परित्यज्यतदेकदेशे वृत्ते:। दग्धभूयस्त्वादि-द्योतनं च फलमिति भाव:।

**रत्नप्रभायाम् -**

मतान्तरासङ्गतिं ध्वनयन्नादौ सिद्धान्तमाह - ''ग्रामोदग्ध:'' इत्यत्र दग्धगृहविशिष्टो ग्राम: इति बोध:। तथा च भाष्यप्रमाणाद् 'ग्राम' पदस्य ग्रामावयवेलक्षणा, अवयवगतदहनरुपधर्मस्य स्वावय-विनि ग्रामे आरोप इति च न युक्तमिति भाव:। अवयवमात्रेण सम्बन्धे समुदायवाचकप्रयोगस्थलेष्वित्यर्थ:। अत: जहदजहदिति अर्थात् - अवयवस्य दहनकर्मत्वेन सम्बन्धात् समुदायेनासम्बन्धाच्च तत्त्वम्। अन्ये इति प्रसङ्गे - अत्रारुचिबीजं तु 'आढ्यमिदं नगरम्' इति भाष्योक्तरीत्या 'ग्रामो दग्ध:' इत्यादौ लक्षणाया अभाव एव। किञ्च 'तत्त्वमसि' इत्यादौ जहदजहल्लक्षणाया: सत्त्वेऽपि जहल्लक्षणयैव निर्वाह: स्वार्थैकदेशत्यागेऽपि स्वार्थत्यागस्य सत्त्वात्। अत: अजहल्लक्षणया तु न निर्वाह:, नञ: प्रतियोगिताऽवच्छेदकावच्छिन्नाभावबोधकत्वादिति।

**निष्कर्ष:-**

उभयो टीकयो: वेदान्तिन: मतेन 'जहदजहल्लक्षणा' इति नैव स्वीकृता। उक्तं च नञ: प्रतियोगिताऽवच्छेदकावच्छिन्नाभावबोधकत्वादिति।

''घटोऽनित्य:'' इति प्रसङ्गेन स्पष्टं जायते। उक्तं यथा वेदान्तपरिभाषायाम् -

''वयं तु ब्रम: 'सोऽयं देवदत्त:', तत्त्वमसि' इत्यादौ विशिष्टवाचकपदानाम् एकदेशेपरत्वेऽपि न लक्षणा शक्त्युपस्थितयो: विशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययो: शक्त्युपस्थितयोरेव अभेदान्वयाऽविरोधात्। यथा 'घटोऽनित्य:' इत्यत्र: घटपदवाच्यैकदेश घटत्वस्य अयोग्यघटव्यक्त्या सह अनित्यत्वान्वय:''।

महाभाष्यकारपतञ्जलि: 'अर्थवद् अधातुरप्रत्यय: प्रातिपदिकम्' इति सूत्रस्य व्याख्याप्रसङ्गे 'ग्रामोदग्ध: पुष्पितं वनम्' इत्यादि प्रयोगे लक्षणायाः निषेधं कृतवान्।

अत: नागेशभट्ट: -'ईदृशेषु जहद् अजहल्लक्षणेत्यन्ये' इति कथनान्तरं ''जहद्-अजल्लक्षणा'' अस्वीकार्यं कृतवान्।

**लक्षणाया: षड्विधत्वम् -**

लक्षणा प्रथमतो द्विविधा शुद्धा गौणी चेति। शुद्धायाश्चत्वारो भेदा: सन्ति। उपादानलक्षणा- लक्षणलक्षणा- सारोपासाध्यवसाना चेति। सारोपासाध्यवसानेति भेदेन गौणीलक्षणा द्वैविध्यं भजते। तत्र शुद्धाया: प्रथमं द्वैविध्यं विवेचयति मम्मटाचार्य: -

**स्वसिद्धये पराक्षेप: परार्थं स्वसमर्पणम्।**

**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा।।**

कुन्ता: प्रविशन्ति यष्टय: प्रविशन्तीत्यादौ स्वस्य शक्यार्थस्य कुन्तादेरन्वयसिद्धये परस्याक्षेप: अशक्यार्थस्याक्षेपो लक्षणमुपादानल-क्षणेत्युच्यते। गंगायां घोष इत्यादौ परार्थं परस्याशक्यार्थस्य तीरादेर-न्वयबोधार्थं स्वसमर्पणं स्वस्य शक्यार्थस्य समर्पणं त्यागो लक्षणं लक्षणलक्षणेत्युच्यते एवञ्च स्वार्थापरित्यागेन परार्थोपस्थापनमुपादानलक्षणा सैवाजहत्स्वार्था लक्षणयाऽन्यत्र मञ्जूषादौ बोध्यते। स्वार्थपरित्यागेन परार्थोपस्थापनं लक्षणलक्षणा सैव जहत्स्वार्था लक्षणोच्यते। यथोक्तम् -

कुन्ता: प्रविशन्ति, यष्टय: प्रविशन्ति इत्यादौ कुन्तादिभिरात्मन: प्रवेशसिद्ध्यर्थं स्वसंयोगिन: पुरुषा आक्षिप्यन्ते। तत उपादानेनेयं लक्षणा। ''गंगायां घोष:'' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गंगाशब्द: स्वार्थमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा। उभयरूपा चेयं शुद्धा उपचारेण मिश्रितत्वात्।''

इत्थं शुद्धायाभेदद्वयमुपवर्णितं पुनरपि भेदद्वयेन सह गौण्या अपि द्वैविध्यं व्याहरति - यथा-

**सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा।**

**विषय्यन्त: कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका।।**

**भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा।**

**गौणी शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधा।।**

वस्तुतस्तु भेदद्वयेन लक्षणावैविध्यमेव भवति। शुद्धा गौणी च। तत्र शुद्धाया उपादानलक्षणा लक्षणलक्षणेति भेदद्वयं जायते। उपादानलक्षणा सारोपात्वेनैकभेदेन सह शुद्धाया द्वेविध्यं, पुनश्च लक्षणलक्षणा साध्यवसानाभेदेन द्वैविध्यं भजते। इत्थं शुद्धायाश्चत्वारो भेदा दृश्यन्ते। गौण्यपि सारोपासाध्यवसानाभेदेन द्वैविध्यं भवति।

''तत्रोपादानसारोपा यथा कुन्ता: पुरुषा: प्रविशन्ति। उपादानसाध्यवसाना यथा कुन्ता: प्रविशन्ति इति। लक्षणा सारोपा यथा आयुर्घृतम्। लक्षणासाध्यवसाना आयुरेवेदम्'' इति गंगायां घोष इति च। गौणसारोपा यथा गौर्वाहीक:। गौणसाध्यवसाना यथा गौरयम् इति प्रदीपोद्योतयो: स्पष्टम्।''

**लक्षणा षड्विधा**

1. प्रयोजनहेतुका स्वसिद्धिनिमित्तकपराक्षेप- लक्षणा उपादानलक्षणा - एका - यथा - ''कुन्ता: प्रविशन्ति'' इत्यत्र कुन्तशब्देन तद्धारकपुरुषाक्षेप:। प्रयोजनञ्च - सद्य: प्रहारतत्परत्वम्।

2. प्रयोजनहेतुका परनिमित्तकस्वसमर्पणलक्षणा –
लक्षणलक्षणा द्वितीया, यथा ''गंगायां घोष:'' इत्यत्र गंगापदस्य गंगात्वविशिष्टतटार्थे प्रयोग: प्रयोजनं शैत्यपावनत्वातिशय:।

3. प्रयोजनहेतुका गौणी सारोपा विषयिविषयोभयोपस्थिति -
लक्षणा इति तृतीया। यथा गौर्वाहीक: इत्यत्र गुणसाजात्याश्रयेण गोपदेन वाहीकार्थो लक्ष्यते। प्रयोजनं जाड्यमान्द्यातिशय:।

4. प्रयोजनहेतुका गौणी साध्यवसाना निगीर्णविषयलक्षणा इति चतुर्थी। यथा - ''गौरयम्'' इत्यत्र। प्रयोजनञ्च नितान्तभेदावगम:।

5. प्रयोजनवती शुद्धा सारोपा कार्यकारणादिभावरूपा इति पञ्चमी। यथा- आयुर्घृतम् इत्यत्र आयुष्निकत्वात् घृतमायुशब्देन लक्ष्यते। प्रयोजनञ्च घृतस्यान्यवैलक्षण्येन कार्यकारित्वख्यापनम्।

6. प्रयोजनहेतुका शुद्धसाध्यवसाना लक्षणेति षष्ठी। यथा - आयु: पिबति इत्यत्र आयु: शब्देन घृतार्थो लक्ष्यते। प्रयोजनञ्चाव्यभिचारेण कार्यकारिकद्योतनम्।

**विश्वनाथमतेन षोडश लक्षणाभेदा: -**

तत्र मुख्यार्थबाधे तन्मुख्यार्थेन सहान्योऽर्थ: प्रतीयते सा लक्षणेति। प्रकाशकारवद् लक्षणालक्षणमुक्तम्। पुनश्च रूढिप्रयोजनभेदेन द्विधा भवति। पुनरपि तद्भेदै: सह षोडशलक्षणाः जायन्ते। यथोक्तम् -

**''मुख्यार्थबाधे तद्युक्तो यथाऽन्योऽर्थ: प्रतीयते।**
**रूढे: प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।।**
**मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वय: सिद्धये।**
**स्यादात्मनोप्युपादानादेषोपादानलक्षणा।।**
**अर्पणं स्वस्य वाक्यार्थेऽपरस्यान्वयसिद्धये''।**

रूढिसारोपा उपादानलक्षणा - अश्व: श्वेतो धावति। प्रयोजनवती सारोपोपादानलक्षणा एते कुन्ता: प्रविशन्ति। रूढिसारोपालक्षण-लक्षणाकलिंगपुरुषो युध्यते। प्रयोजनवतीलक्षणलक्षणा आयुर्घृतम्। पुन: रूढिप्रयोजनवतीसाध्यवसानोपादानलक्षणा- श्वेतो धावति कुन्ता: प्रविशन्ति। तथैव रूढ्यादिभेदेन साध्यवसानालक्षणलक्षणा- कलिंग: साहसिक:, गंगायां घोष: इति। गौणीसाध्यवसानोपादानलक्षणा तैलानि हेयन्ते सुखानि एते, राजकुमारा गच्छन्ति। रूढिप्रयोजनभेदेन गौणीसाध्यवसानालक्षणलक्षणा राजकपटकं शोधयति, गौर्जल्पति। इत्यादौ इत्थं षोडशभेदा: प्रदर्शिता:।

**लक्षणाभेदसमीक्षणम् - (साहित्यिकानां नये)**

मूलतो लक्षण द्विविधा - रूढिहेतुका प्रयोजनहेतुका च। तत्र प्रयोजनहेतुका द्विविधा शुद्धा गौणी च। आद्या चतुर्विधा उपादानलक्षणा लक्षणलक्षणा सारोपा साध्यवसाना चेति। गौणी तु सारोपा साध्यवसानाचेति द्विविधैव। तेन प्रयोजनाश्रिता लक्षणलक्षणा षड्विधेति। शब्दान्तरेण कथने शुद्धाया द्वावेव भेदौ, उपादानलक्षण-निमित्तकौ। उपादानलक्षणाया: पुनर्द्वौ भेदौ सारोपा साध्यवसाना चेति। यथा - कुन्ता: पुरुषा: प्रविशन्ति। कुन्ता: प्रविशन्ति इति। लक्षणलक्षणाया अपि तावन्तावेव भेदौ यथा आयुर्घृतम्, आयुरेवेदम्'' इत्यादौ। गौण्या: सारोपा-साध्यवसानाभेदाभ्यां भवति लक्षणाया: षाड्विध्यम्। रूढिलक्षणाया: कथं न गणेनेति न चिन्त्यं प्रयोजनवत्या एव प्रसंगात् तस्या एव व्यंग्ये उपयोगाच्च। यथाहि उपादानलक्षणाया अर्थानतरसंक्रमितवाच्ये लक्षणलक्षणाया ।

**लक्षणाप्रयोज्ये शाब्दबोधे शक्यतावच्छेदकमेव प्रकार:**

शब्दश्रवणात् पूर्वं बुद्धौ पदार्थानाम् उपस्थितिर्भवति। एषा स्मृतिशब्देनाऽपि कथ्यते। पश्चाद् उपस्थितानां पदार्थानां योग्यतादि-वशेन अन्वयस्य (सम्बन्धस्य) बोधो भवति। अयमेवान्वयस्य बोध: शाब्दबोध: कथ्यते। शाब्दबोधे कश्चनार्थ: प्रकारो भवति, कश्चन विशेष्यश्च। अत्र प्रकारशब्देन विशेषणं गृह्यते। यत्र लक्षणया शाब्दबोधो भवति तत्र शक्यताया अवच्छेदकं प्रकारो भवतीति मम्मटादय आलङ्कारिका मन्यन्ते। किन्तु केचन वदन्ति यद् यदि सर्वत्र लाक्षणिके शाब्दबोधे शक्यतावच्छेदकमेव प्रकार: स्यात् तदा 'कचत: त्रस्यति वदनम्' इत्यादौ त्रासादीनाम् असङ्गति: स्यात्। अत: सर्वत्र शक्यतावच्छेदकस्यैव प्रकारता स्वीकर्तुं न शक्यते। किन्तु तेषामिदं कथनं समीचीनं न वर्तते। लक्षणाप्रयोज्यशाब्दबोधे सर्वत्र शक्यतावच्छेदक एव प्रकारो भवतीत्येव मतं युक्तं वर्तते। एतत् सर्वं समासेनेह विचार्यते -

'गङ्गायां घोष:' इति लक्षणाया: प्रसिद्धमुदाहरणं विद्यते। अत्र गङ्गाशब्देन नदीविशेषस्य गङ्गाया अभिधया बोधो भवति। अभिधया बोध्योऽर्थ: शक्यो वाच्यो वा कथ्यते। अतोऽत्र शक्यार्थो गङ्गा वर्तते। तत्र शक्यता भवति। शक्ये विद्यमानोऽसाधारणो धर्म: शक्यताया अवच्छेदक उच्यते। अतोऽत्र शक्यतावच्छेदकं गङ्गात्वं विद्यते। मुख्यार्थबाधादौ सति गङ्गापदेन लक्षणया तटस्य उपस्थितिर्भवति। लक्षणया बोध्यस्ततो लक्ष्यो निगद्यते। तस्मिन् लक्ष्यता भवति। लक्ष्ये वर्तमानोऽसाधारणो धर्मस्तटत्वं विद्यते। अतस्तदेव लक्ष्यतावच्छे-कमुच्यते। गङ्गापदेन तटस्योपस्थिति: लक्ष्यता भवति। ततो लक्षणयोपस्थितस्य तटस्य, अभिधयोपस्थितस्य घोषस्य चान्वयस्य बोधो भवति। तटत्वविशिष्टे तटे घोष इति लक्षणाप्रयोज्यो बोधो भवति। लाक्षणिकेऽस्मिन् बोधे तटत्वं प्रकारो भवति। इदं लक्ष्यतावच्छेदकं वर्तते। एव लाक्षणिके शाब्दबोधे जाते व्यञ्जनया तटे गङ्गात्वं प्रकारत्वेन बोध्यते। ततो गङ्गात्वविशिष्टे तटे घोष: इति वैयञ्जनिको बोधो भवति। अस्य मूलं लक्षणा वर्तते। व्यञ्जनाया उत्थानस्य कारणं लक्षणैवास्ति। यदि शब्दप्रयोगे लक्षणया न स्यात् तदा

‘गङ्गातटे घोषः’ इति कथनेन व्यञ्जनोऽपि न स्यात्। एवं व्यञ्जनाजन्यो बोधो लक्षणया प्रयोज्यो वर्तते। अत्र शक्यतावच्छेदकं गङ्गात्वमेव प्रकारो भवति।

तटे व्यञ्जनया गङ्गात्वस्य प्रतीत्या शैत्यपावनत्वादीनामपि प्रतीतिर्भवति तद् व्याप्यं कथ्यते, यत्तु तदपेक्षयाऽधिकदेशे भवति तद् व्यापकं कथ्यते। अत्र गङ्गात्वं व्याप्यं वर्तते, शैत्यपावनत्वादि व्यापकं विद्यते। गङ्गात्वं गङ्गायामेव भवति, किन्तु शैत्यपावनत्वं गङ्गायामन्यत्र गोदवर्यादौ चापि भवति। इत्थं तटे व्याप्यस्य गङ्गात्वस्य प्रतीत्या शैत्यपावनत्वादीनां व्यापकानामपि प्रतीतिर्भवति। ततश्च व्यञ्जनयैव ‘शैत्यपावनत्वादिविशिष्टे तटे घोषः’ इति बोधो भवति। इदमेव शैत्यादीनां ज्ञानं लक्षणायाः प्रयोजनमुच्यते। उक्तस्य प्रयोजनस्य सिद्धये लक्षणाप्रयोज्ये पूर्वोक्ते शाब्दबोधे शक्यतावच्छेदकं गङ्गात्वमेव प्रकारतया स्वीक्रियते।

अन्येषां मतं वर्तते यद् यद्यपि लक्षणया लक्ष्यस्योपस्थितिर्लक्ष्यतावच्छेदकरूपेणैव भवति, किन्तु शाब्दबोधः शक्यतावच्छेदकरूपेणैव भवति। एतन्मते ‘गङ्गायां घोषः’ इत्यत्र गङ्गाशब्देनोपस्थितौ तटत्वमेव प्रकारो भवति, किन्तु शाब्दबोधे गङ्गात्वं प्रकारो भवति। ततश्च ‘गङ्गात्वविशिष्टे तटे घोषः’ इति लाक्षणिकः शाब्दबोधो जायते। ‘शैत्यपावनत्वादिविशिष्टे तटे घोषः’ इति बोधस्तु पश्चात् व्यञ्जनया भवति। एवं पूर्वबोधे शक्यतावच्छेदकं गङ्गात्वमेव प्रकारो भवति। शक्यतावच्छेदकारोपो हि लक्षणा कथ्यते। यद्यपि नियमोऽयं वर्तते यद् यदुपस्थितौ प्रकारो भवति तदेव शाब्दबोधेऽपि भवति, यतोहि उपस्थितिशाब्दबोधयोः समानप्रकारकत्वस्य नियमो वर्तते, तथापि लाक्षणिक बोधस्थले नियमोऽयं न स्वीक्रियते। लक्षणातिरिक्त एव स्थले तादृशो नियमो मन्यते। एवमस्मिन् मते कथितसमानप्रकारकत्वरूपस्य नियमस्य संकोचो भवति।

एवं विलोकितं यदुक्तं मतद्वयेऽपि लक्षणाप्रयोज्ये शक्यतावच्छेदकमेव प्रकारो भवति। किन्तु रसगङ्गाधरस्य चन्द्रिकायां प्रतिपादितं यत् सर्वत्र शक्यतावच्छेदकमेव प्रकारत्वेन स्वीकर्तुं न शक्यते। यतो हि ह्यस्मिन् नायिकाङ्गवर्णनपरे श्लोके लक्षणा दृश्यते -

**कचतस्त्रस्यति वदनं वदनात् कुचकुड्मलं बिभेति।**
**मध्याद्बिभेति नयनं नयनादधरः समुद्विजति।।**

अत्र कचेन राहुः, वदनेन चन्द्रः कुचकुड्मलेन कमलम्, मध्येन सिंहः, अधरेण पल्लवश्च लक्षणयोपस्थाप्यते। अत्र यदि बोधे शक्यताव-च्छेदकानां कचत्ववदनत्वकुचकुङ्मलत्वमध्यत्वाधरत्वानां राहुचन्द्र-कमलसिंहपल्लवेषु प्रकारत्वं स्वीक्रियते तदा मुखे, कुचकुड्मले, मध्ये, नयनेऽधरे च त्रासादीनां सङ्गतिर्न भवति। किन्तु राहुत्वादिरूपं लक्ष्यतावच्छेदकमेव प्रकारो यदा मन्यते तदा राहुत्वादिनैव कचादि-रूपह्वादीनां प्रतीत्या वदनादौ त्रासादिः सम्भवति। अतः क्वचिच्छक्य-तावच्छेदकस्य क्वचिच्च लक्ष्यतावच्छेदकस्य प्रकारत्वं स्वीकार्यम्।

किन्तु रसचन्द्रिकादौ प्रतिपादितं यत् कचत्वादिनापि राह्वादेः प्रतीतौ त्रासादीनामुपपत्तिरत्र भवत्येव। राहुं कचरूपेण स्थितं मत्वा मुखचन्द्रस्त्रस्यति, चन्द्रं मुखरूपेण वर्तमानं मत्वा कुचकमलं बिभेति, सिंहं कटिरूपेण सन्तं विज्ञाय नयनमृगो बिभेति मृगं नयनरूपेण विलसन्तं निश्चित्य अधरपल्लवः समुद्विजति इति तात्पर्यमुक्तश्लोकस्य। अतः सर्वत्र लक्षणाप्रयोज्ये शाब्दबोधे शक्यतावच्छेदकस्यैव प्रकारेत्वे नासङ्गतिः।

वस्तुस्तु ‘कचतस्त्रस्यति’ इत्यादौ लक्षणास्वीकार एव न सम्भवति। कचादयो हि वर्णनीयत्वेन विषयाः सन्ति। विषयवाचकानां विषयिषु लक्षणा न प्रसिद्धा। चन्द्ररूपेण विषयिवाचकेन पदेन विषयस्य मुखस्य लक्षणया बोधः साध्यवसानायां ‘चन्द्रराजी विराजते’ इत्यादौ दृश्यते, न तु ‘मुखम्’ इत्युक्ते लक्षणया विषयिणश्चन्द्रस्य बोधः। साध्यवसानायां हि विषयिण एव प्रयोगः। अतः ‘कचतस्त्रस्यति’ इत्यादौ कचादीनां राह्वादिषु न लक्षणा उक्तपद्ये ‘‘कचो राहुः’’, वदनं चन्द्रः, कुचकुड्मलं कमलम्, मध्यभागः सिंहः नयनं मृगः, अधरः पल्लवः’ इति रूपकालङ्कारस्य व्यक्तिरेवात्र मन्तव्या। तद्रूपकं त्रासादीनां वाच्यानां साधकत्वेन गुणीभूतमिति त्वन्यत्।

अतः सिद्धं यत् हयल्लक्षणाप्रयोज्ये शाब्दबोधे शक्यतावच्छेकमेव प्रकारः इति।

**अयमाशयः -**

लक्ष्यतेऽर्थोऽनयेति करणव्युत्पत्या लक्ष्धातोर्ल्युट्प्रत्ययेन लक्षणापदं निष्पद्यते। अन्वयोपपत्तये तात्पर्योपपत्तये वा विरतायामभिधायां लक्षणाया उपयोगो भवति। पदवाक्यप्रमाणज्ञाः स्वस्वशास्त्रानुसारेणमां लक्षणामाटीकन्ते। तथा हि - स्वशक्यसम्बन्धो लक्षणेति नैयायिकाः। स्वबोध्यसम्बन्धो लक्षणेति मीमांसकाः। वैयाकरणाः पुनः सति तात्पर्ये सर्वे सर्वार्थवाचका इत्युक्त्या लक्षणामनङ्गीकुर्वाणाः प्रसिद्धाप्रसिद्धाभ्यां भेदाभ्यां शक्तेरेव द्वैविध्यमामनन्ति। आरोपिता क्रिया लक्षणेत्युद्घोषयतामालङ्कारिकाणामेकः पृथगेव पन्था। अत्र क्रियेति शब्दव्यापारः। मम्मटाचार्यो ‘मुख्येनामुख्यो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठा लक्षणेति वृत्तौ स्फोरितवान्। अर्थाद् अन्तरं व्यवधानं, तत्सहितः सान्तरः, स चासावर्थश्चेति सान्तरार्थः, तत्र निष्ठा तात्पर्यं यस्येति सान्तरार्थनिष्ठः शब्दव्यापारो लक्षणेति

वाक्यार्थ:। तथा चाहु: 'अतस्मिंस्तत् समारोपो भक्तेर्लक्षणमिष्यते। एवं शक्यव्यवहितलक्ष्यार्थविषयत्वात् शब्दे आरोपित:, वस्तुतोऽर्थनिष्ठो व्यापारो लक्षणेति निर्गलितोऽर्थ:।

इयं तावद् द्विविधा निरूढा प्रयोजनवती च। प्रयोजनवत्यपि गौणीशुद्धाभ्यां द्विधा। तत्राद्या सारोपासाध्यवसाना चेति भेदद्वयवती, अन्या उपादानलक्षणा-लक्षणलक्षणा-सारोपा-साध्यवसाना चेति चतुर्विधा सती प्रयोजनवती साकल्येन षड्विधा सम्पद्यते। तत्र निरूढाया: कर्मणि कुशल इत्युदाहरणम्। प्रयोजनवत्याश्च क्रमेण गौर्वाहीक:, गौर्जल्पति, कुन्ता: प्रविशन्ति, गङ्गायां घोष:, आयुर्घृतम्, आयु: पिबतीत्यादीन्युदाहरणानि। एतेषामेव प्रयोजनवत्या: भेदानां कृते 'लक्षणा तेन षड्विधेति मम्मटभट्टस्य सूत्रावतार:। वस्तुतस्तु 'व्यङ्गयेन रहिता रूढौ सहिता तु प्रयोजने' इति व्याचक्षाणेन वाग्देवतावतारेण प्रयोजनवत्या: गूढव्यङ्ग्या गूढव्यङ्गयेतिभेदाभ्यां द्वैविध्यं सम्पादयता द्वादशविधत्व-मङ्गीकृतम्। एवञ्चैकस्या: निरूढाया: संयोजनेन काव्यप्रकाशे त्रयोदशसंख्यात्मिका लक्षणाभेदसम्पत्ति:। उक्तञ्च- तच्च गूढमगूढं वा तदेषां कथिता त्रिधा गूढं यथा- 'मुखं विकसितस्मितमित्यत्र, अगूढञ्च श्रीपरिचयाज्जडा अपीत्यत्र च।

प्रथमं लक्षणाया अष्टौ भेदान् प्रतिपादयता साहित्यदर्पणकारेण तेषां गौणीशुद्धाभ्यां द्वैविध्यं परिकल्प्य षोडश भेदा: स्वीकृता:। उक्तञ्च - 'लक्षणा षोडशभेदिता' इति। पण्डितराजोऽपि निरूढाया: द्वौ, प्रयोजनवत्याश्च षडिति लक्षणाया: अष्टौ भेदानङ्गीकरोति। तथा चोक्तं रसगङ्गाधरे- 'तत्राद्यवर्गे सादृश्यसम्बन्धेन, द्वितीयवर्गे च तदितर-सम्बन्धेन लक्षणाया: प्रवृत्तेर्निरूढायामपि गौणीत्वशुद्धात्वाभ्यां द्वैविध्यमामनन्तीति। वृत्तिवार्तिककारेणाप्पयदीक्षितेनापि शुद्धाया: जहद् अजहद्जहदजहल्लक्षणासारोपासाध्य-वसानेति पञ्चभेदान् विधाय सारोपासाध्यवसानाभ्याञ्च गौण्या: द्वाविति साकल्येन सप्त भेदा: कृता:। तत्रोत्तरमीमांसासम्प्रदायानुक्रमेणाङ्गीकृतो ग्रामो दग्धो वनं पुष्पितमित्याद्युदाहरणको जहदजहदाख्यो भेद: साहित्यसम्प्रदायेषु सर्वथैव नूतन:।

यच्च, गौणीशुद्धाभ्यां निरूढाया: द्वैविध्यं परिकल्प्य मम्मटमतेनापि केचन लक्षणायाश्चतुर्दशत्वं प्रतिपादयितुं यतमाना: दरीदृश्यन्ते, तन्न। काव्यप्रकाशे तद्भेदस्यानिर्देशात्। किञ्चातिप्रसिद्धटी-काकारवामनाचार्योक्त्यापि अस्य लक्षणाभेदस्य त्रयोदशत्वमेव सि-द्ध्यति। तथाहि - 'तथा च व्यङ्ग्यरहिता रूढिमूला एकविधा, उक्तष-ड्विधा प्रयोजनमूला लक्षणा गूढव्यङ्ग्यागूढव्यङ्ग्यत्वेन द्विधा, एवं मिलित्वा लक्षणा त्रयोदशविधा बोध्या इति।

मुकुलभट्टो गौणशुद्धयोर्भेदकत्वेन लक्ष्यार्थलक्षकार्थयोर्भेदरूपं ताटस्थं मनुते। तथा चोक्तम् - तटस्थे लक्षणा शुद्धा इति। अनेन शुद्धोपचारमिश्राभेदाभ्यां लक्षणाया: द्वैविध्यं स्वीकृत्य पुनश्चोपचार-मिश्राया: शुद्धासाध्यवसानागौणीसारोपागौणीसाध्यवसानेति चत्वारो भेदा: कृता:। शुद्धायाश्च पुनरुपादानलक्षणभेदाभ्यां द्वैविध्यं स्वीकृतम्। एवमाहत्य तेनापि षड्भेदात्मिका लक्षणाङ्गीकृता। मुकुलभट्टानुसारे-णोपचारस्य मिश्रणं शुद्धायामपि भवति। किन्तु मम्मटाचार्य: शुद्धाया-मुपचारस्य मिश्रणं नाङ्गीकरोति। तदनुसारेणोपचार एव गौणशुद्धयोर्भेदको धर्मो वर्तते। उपचारश्चात्यन्तं विशकलितयो: पदार्थयो: सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रमस्ति। अर्थाद्यत्र सादृश्यातिशयेनाभेदस्तत्र गौणी, यथा- सिंहो माणवक:। यत्र च सादृश्यादन्योपचारमिश्रणरूपकार्यकारणभावस्तत्र शुद्धा, यथा चायुर्घृतमित्यादि। तथा चोक्तं मम्मटेन 'उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात्।'

**भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा।**
**गौणौ शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधा।।' इति।**

इदानीतेषां षड्भेदानामुदाहरणान्याश्रित्य किञ्चिद्विचार्यते। अत्रेदमवधेयं यन्मुकुलभट्टोदाहृतान्येव लक्षणाया: उदाहरणानि, केवलमुपादानलक्षणाया: उदाहरणद्वयं परिहृत्य, वाग्देवतावतारेण चोद्धृतानि। मुकुलभट्टेनोपादानलक्षणाया: द्वे उदाहरणे प्रदत्ते। एकं पदलक्षणाया: गौरनुबन्ध्य इति, अपरञ्च वाक्यलक्षणाया: पीनोऽयं देवदत्तो दिव न भुङ्क्ते इति। मीमांसका अर्थवादवाक्यानां प्राशस्त्ये लक्षणां विधाय वाक्येष्वपि लक्षणां व्यवहरन्ति। अत एव ते 'स्वबोध्यसम्बन्धो लक्षणा' इति ब्रुवते। जातौ शक्तेरङ्गीकाराद्गौर-नुबन्ध्य' इत्यत्र गौरितिपदेन गोत्वस्य ग्रहात्तत्र बन्धनक्रियाया: असम्भवादन्वयोपपत्तये मीमांसका: लक्षणया व्यक्तेरुपादानं कुर्वन्तीति मुकुलभट्टेन गौरनुबन्ध्य इत्युपादानलक्षणाया: उदाहरणं प्रदत्तम्। उक्तञ्च 'अत्र हि गोत्वस्य यागम्प्रति साधनत्वं शाब्दं व्यक्त्याक्षेप-मन्तरेण नोपपद्यत इति तत्सिद्ध्यर्थतया व्यक्तेराक्षेप:। अत्र मम्मटाचार्यो बूरते यद्विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायादभिधा गौरितपदाद्गोत्वरूपमर्थमभिधाय पुनरपि गोव्यक्तेग्रर्हं कर्तुमसम्भवा, तथा च लक्षणा अपि रूढिप्रयोजनयोरन्यतर-स्याप्यसत्वात् तत्र गोव्यक्तिरूपमर्थं दातुमसमर्था। अतो यथा क्रियतामित्यत्र त्वयेति कर्ता, कुर्वित्यत्र पाकमिति कर्मार्थाध्याहार-वादमवलम्ब्य आक्षिप्यते। यथा वा प्रविश इत्यत्र गृहं, पिण्डीमित्यत्र भक्षयेति शब्दाध्याहार: क्रियते। तथैवात्रापि जातेर्व्यक्त्यविनाभा-वित्वाज्जात्या व्यक्तिराक्षिप्यतां मुधा

लक्षणया। उक्तञ्च, मूले '.... इत्युपादानलक्षणा नोदाहर्तव्या। न ह्यत्र प्रयोजनमस्ति न वा रुढिरियम्। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते।'

एवमेव 'पीनोऽयं देवदत्तो दिवा न भुङ्क्ते' इत्यत्रापि वाक्यलक्षणायामुपादानलक्षणाया: उदाहरणमामनन्ति मीमांसका:। तथा हि दिवाऽभु-ञ्जानस्य रसायनविशेषमसेवमानस्य देवदत्तस्य पीनत्वोपपत्तये रात्रिभोजनमाक्षिप्यते इत्युपादानलक्षणोदाहर्तव्ये'ति कथयन्ति। उक्तञ्चाभिधावृत्तिमातृकायाम् - ''अत्र पीनत्वं दिनाधि-करणभोजनाभावविशिष्टतयावगम्यमानमेव कार्यत्वात् स्वसिद्ध्यर्थत्वेन कारणभूतं रात्रिभोजनमाक्षेपादभ्यन्तरीकरोति। किन्तु मम्मट: अत्रापि - 'रात्रिभोजनं न लक्ष्यते, श्रुतार्थापत्तेरर्थपत्तेर्वातस्य विषयत्वादि' त्युक्त्या उपादानलक्षणां निषेधति। अयं भावो यन्मीमांसका: प्रत्यक्षादिवदर्थापत्तिप्रमाणमपि स्वीकुर्वन्ति। अर्थापत्तिश्चानुपपद्य-मानार्थदर्शनात्तदुपपादकीभूतार्थस्य कल्पनरूपास्ति। अत्र दिवाऽभुञ्जानस्य देवदत्तस्य पीनत्वमनुपपद्यमानं रात्रिभोजनञ्च तदुपपादकी-भूतोऽर्थ:। अत उक्तवाक्योपपत्तये तदुपपादकीभूतार्थस्य रात्रिभो-जनस्य श्रुतार्थापत्या दृष्टार्थापत्या वा परिकल्पनया वाक्यं सङ्गच्छत एव, अतोऽत्रोपादानलक्षणास्वीकरणं व्यर्थम्।

यच्च 'गङ्गायां घोष:' इति वाक्यं मुकुलमम्मटभट्टाभ्यां स्वस्वग्रन्थे लक्षणलक्षणाया: उदाहरणप्रसङ्गे गृहीतं तत्र जहाति स्वमर्थं येति व्युत्पत्या जहत्स्वार्थालक्षणा परस्यान्वयोपपत्तये स्वीयमर्थं विजहाति। अर्थाद् घोषस्याधारसिद्धये गङ्गाशब्द: स्वीयं प्रवाहरूपमर्थं विहाय तटरूपमर्थं गृह्णाति। तथा चोक्तं मम्मटेनापि 'परार्थं स्वसमर्पणमि'ति। तद्यदि घोषस्याधारसिद्ध्यर्थं गङ्गापदं स्वीयं प्रवहारूपमर्थं विहाय तटरूपमर्थं प्रददाति तदास्य वाक्यस्यार्थो लक्षणया 'तटे घोष:', गङ्गातटे घोषो वेति सन्देह:। 'तटे घोष:' इति लक्ष्यार्थस्वीकारे शैत्यपावनत्प्रतीति भङ्ग:, गङ्गातटे घोष इति लक्ष्यार्थस्वीकारे चोदाहरणेऽतिव्याप्तिप्रसङ्ग:, स्वप्रवाहरूपार्थसमर्पणाभावात्।

यत्तु वृत्तिवार्तिके, गङ्गाशब्दात् केवलं तटरूपार्थ एव प्रतीयते, न तु तदुपरक्तस्तत्सम्बद्धो वा तट:। तत्र गङ्गाशब्दप्रयोगात् केवलमयमेव विशेषो यद्वितस्ताया तटो नोपस्थितो भवतीत्युक्तम्। यतो हि 'गङ्गायां घोष' इत्यत्र घोषाधिकरणभूततटोपलक्षितानुसन्धानेन गङ्गायां घोषो, न वितस्तायामिति गङ्गाशब्दे प्रयुज्यमाने तटस्य स्रोतोविशेषणोप-लक्षकत्वमात्रोपयुक्तत्वेनोपरागो न प्रतीयते, तटस्थत्वेनैव तस्य तटस्य प्रत्ययादित्युक्त्याप्यवसितमेव समाधानम्। यतो ह्ययं तट: गङ्गाया एव, न वितस्ताया इति सम्बन्धविशेषप्रतीते: कुतो जहल्लक्षणा नाम? मुकुलभट्टस्येदं समाधानं ताटस्थ्यसिद्धान्तानुसारि लक्ष्यार्थलक्षकार्थयोर्भेदपक्षमाश्रित्य वर्तते। किन्तु, ताटस्थ्यसिद्धान्तो न हि मम्मट-भट्टस्याधार:। अतोऽयं गङ्गात्वेन, गङ्गयाभेदसम्बन्धत्वेन वा तटस्योपस्थितिं मनुते। कथमन्यथा शैत्यादिप्रतीतावपि पावनत्वातिश-यप्रतीति:। तथा चानयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम्। तटादीनां हि गङ्गादिशब्दै: प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयि-षितप्रयोजनसम्प्रत्यय:। गङ्गासम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणाया: को भेद इत्युक्तवान्। केचन कुन्ता: प्रविशन्तीत्यत्र यथा कुन्तादिभिरात्मन: प्रवेशसिद्ध्यर्थं पुरुषा आक्षिप्यन्ते, तथैव गङ्गायां घोष इत्यत्र सति बाधे गङ्गात्वेन तटोपस्थितौ उपादानलक्षणैव, व्यर्थमेवात्र लक्षणलक्षणा-कल्पनाप्रसङ्ग इत्याक्षिपन्ति, तन्न। बाधितार्थस्थले अबाधितार्थं लक्षयित्वा वाक्यार्थान्वयनमेव लक्षणाया: विषयता। अत: कुन्ता: प्रविशन्तीत्यत्र कुन्तादिभिरात्मन: प्रवेशसिद्ध्यर्थं पुरुषा: आक्षिप्यन्त इत्युपादानलक्षणा। गङ्गायां घोष इत्यत्र तु गङ्गात्वेन तीरोपस्थितावपि पदार्थसमन्वये नास्ति गङ्गात्वस्योपयोगित्वमिति नात्रोपादानल-क्षणाया: अवसर:।

गौणीसाध्यवसानलक्षणाया उदाहरणस्य गौरित्यस्य लक्षणा-वृत्तिबोध्योऽर्थो लक्ष्यार्थ: क:? इति जिज्ञासायां काव्यप्रकाशे त्रीणि मतान्युल्लिखितानि। तत्र मम्मटाभिप्रेतोऽर्थ: क इति विचारयिष्यते। तथाहि स्वार्थस्य गोशब्दस्य सहचारिणो जाड्यमान्द्यादयो गुणा: लक्ष्यमाणा: लक्षणावृत्तिबोध्या: सन्त: गोशब्दस्य परार्थाभिधाने वाहीकरूपार्थाभिधाने प्रवृत्तिनिमित्तं भवन्तीत्येक: पक्ष:। अर्थात् शब्दारोपपूर्वकोऽर्थारोप इति केचित्। गोशब्दस्य सहचारिभि: जाड्यमान्द्यादिभि: गुणैरभिन्नतया वाहीकगता: गुणा: एव लक्ष्यन्त इति द्वितीय: पक्ष। अत्र अर्थारोपपुरस्सर: शब्दारोप:। गोवाहीकयो: सामान्यगुणानां जाड्यमान्द्यादीनामाश्रयभूत: वाहीकार्थ एव लक्ष्यते इति तृतीय: पक्ष:। अत्र समप्राधान्याद् द्वयोरारोप: इत्यपरे। अभिनवगुप्तेनाऽपि लोचनटीकायामिमानि त्रीणि मतान्युद्धृतानि- 'लक्षणा तावद् गौणीमपि व्याप्रोति। केवलं शब्दस्तमर्थं लक्षयित्वा तेनैव सह समानाधिकरण्यं भजते। अर्थो वार्थान्तरं लक्षयित्वा स्वाचकत्वेन तद्वाचकं समानाधिकरणं करोति। शब्दार्थौ वा युगपल्लक्षयित्वा ताभ्यामेव शब्दाभ्यां मिश्रीभवत इति। अत्र काव्यप्रकाशस्य टीकाकारा: 'न परे अपरे अर्थात् स्वीये इति विच्छिद्य तृतीयं मतमेवास्मिन् विषये मम्मटस्याभिप्रेतमिति ब्रुवते। यद्धि समीचीनम्। किञ्च, मुकुलभट्टोऽप्याह - अत्र हि गोगतजाड्यमान्द्यादिसदृशजाड्यमान्द्यादियोगाद्वाहीके गोशब्दगोत्वयोरुपचार इति। वैयाकरणसिद्धान्तसमाहितधीरपि आचार्यवरो मीमांसकानामेतद्विषयकं पन्थानम-नुसृत्य स्वीयां नीरक्षीरविवेकितां प्राकटयत्। किञ्च तृतीय: पन्था: एव समीचीन: काव्यव्यवहारे सर्वत्र

शब्दार्थयोरविनाभावादिति। समर्थयता चोक्तं भट्टोभटेनापि 'केचिच्छब्दारोपपूर्वकमर्थारोपं ब्रूवते। अपरे विपर्ययम्। अन्ये यौगपद्यम्। एष एव युक्त: पक्ष:' इति।

एवं निरूढाया: केवलमेको भेद:, कर्मणि कुशल इति चोदाहरणं, कुशलशब्दस्य विवेचकत्वार्थे रूढत्वात्। इयं निरूढा काव्ये नात्यन्तमुपायोगिनीति नास्यास्तथा भेदोपभेदैर्विस्तर:। प्रयोजनवती पुन: षड्विधासत्यत्यन्तं काव्यमार्गे हितावहा भवतीति समेषा-मनुभव:। तत्रोपादानलक्षणाया: कुन्ता: प्रविशन्तीत्युदाहरणं, प्रयोजनं चास्य कुन्तधारिणां बाहुल्यप्रदर्शनम्। गङ्गायां घोष: लक्षणलक्षणाया: उदाहरणं, प्रयोजनञ्च शैत्यपावनत्वादीनां प्रतिपादनम्। शुद्धासारो-पाया: आर्युर्घृतं, शुद्धासाध्यवसानायाश्च आयुरेवेदमित्युदाहरणद्वयं, प्रयोजनञ्च क्रमेणान्यवैलक्षण्यकार्यकारित्वादिकमायुष्ट्वकारि-त्वञ्च। गौणीसारोपासाध्यवसानयोश्च क्रमेण गौर्वाहीको गौरयमित्युदाहरणद्वयं, प्रयोजनञ्च ताद्रूप्यप्रतीति: सर्वथैवाभेदावगमनं मूर्खत्वातिशय-प्रतिपादनञ्चेत्यादिकं सर्वं मनसि निधाय प्रयोजनवतीलक्षणाया: विषये वाग्देवतावतारेणोक्तं लक्षणा तेन षड्विधेति शम्।

**मीमांसकाभिमतलक्षणानिरूपणम्**

ननु स्वशक्यसम्बन्धो लक्षणा इत्युक्तं शक्तत्वं तु पदस्यैव भवति, न तु वाक्यस्येति। वाक्यार्थस्य वाक्यबोध्यत्वेन वाक्यार्थेऽपि लक्षणा-विषयत्वापादकं मीमांसकमतमनुवदति - ''उक्तं लघुमञ्जूषायाम् -

''ज्ञाप्यसम्बन्धेनो द्बुद्धशक्तिसंस्कारतो बोधे लक्षणा। गभीरायां नद्या घोष:' इत्याद्यनुरोधात्।।

**परमलघुमञ्जूषाकृतस्तु -**

''स्वबोध्यसम्बन्धो लक्षणा इति केचित्। गभीरायां नद्यां घोष इत्याद्यनुरोधात्। तथाहि - न तावद् गभीरपदं तीरलक्षकम्, नद्यामि-त्यनन्वयापत्ते:। न हि तीरं नदी। अत एव न नदीपदेऽपि, गभीरपदार्थानन्वयात्। न हि तीरं गभीरम्। न च प्रत्येकं पदद्वये सा, विशिष्टनदीबोधानापत्ते:। तस्मात् समुदायबोध्यगभीरत्वविशिष्टनदी पदार्थ: तत्सम्बन्धो लक्षणेति।

**अयमाशय:-**

स्वशक्यसम्बन्ध एव लक्षणेति स्वीकारे तस्य पदमात्रविषयत्वेन न हि वाक्यार्थे कथमपि लक्षणा स्यात्तत्र शक्तेरभावात्। तथा सति गभीरायां नद्यां घोष: इत्यत्र लक्षणाविषयत्वं नापद्येत। किञ्च गभीरत्वविशिष्टा या नदी तत्तीरे घोष: इत्यर्थस्तत्राभीष्ट:। स च पदलक्षणया कथमपि नाप्तुं शक्यते। यतो हि यदि नदी पदे तीरलक्षणा क्रियते तदा गभीरे नदीतीरे घोष इति बोध: स्यात् किन्तु न हि तीरं गभीरम्। यदि हि गभीरपदे तीरलक्षणा क्रियते तदापि तीराभिन्ना नदीति बोधापत्ति: स्यात्, साऽप्यसङ्गतैव तीरनद्योरभेदस्य बाधात्। पदद्वये एव प्रत्येकं लक्षणास्वीकारेऽपि न कार्यसिद्धि: गभीरपदस्य गभीरतीरे नदीपदस्य नदीतीरे लक्षणा स्याद्येन 'गभीरतीराभिन्न-नदीतीरे घोष:' इत्यर्थबोध: स्याद्यो हि नाभीष्ट:। यत्तु गभीरपदं नदीपदञ्चोभयमपि गभीरत्वविशिष्टनदीतीरलक्षकं तदा एकपदादर्थ-प्रत्ययेऽपर पदं तात्पर्यग्राहकमिति चेन्न कस्य लक्षकत्वं कस्य वा तात्पर्यग्राहकत्वमिति विनिगमनाविरहात्। न च नदीपदस्य द्रव्यवाच-कतया साक्षात्सम्बन्धानुरोधेन तत्रैव सेति वाच्यं, गभीरपदस्याऽपि नित्यं गुणिवाचकतया तेनापि साक्षात्सम्बन्धस्यैव सत्त्वात्। अत: समुदाये एव लक्षणा स्वीकार्या।

तेन स्वबोध्यसम्बन्धो लक्षणेति स्वीकार्यैवेति।

**अत्र कुञ्चिकाकृतस्तु -**

स्वज्ञाप्यसम्बन्धो लक्षणा। भवति च वाक्यार्थोऽपि वाक्यज्ञाप्य:, तेन वाक्यस्य लक्षणेति मीमांसकमतेनाह- ज्ञाप्येति। गभीरायां नद्यामिति वाक्यस्य बोध्या गभीराभिन्ना नदी। तत्सम्बन्धस्तीर इति भाव:। न हि तीरं नदीति। गभीरतीरे नद्यामित्यर्थासम्भवात्। न नदीपदेऽपीति। नदीपदेन नदीतीरग्रहणेगभीरसामानाधिकरण्यासम्भव इत्यर्थ:। पदद्वये गभीरपदे नदीपदे च। गभीरपदस्य गभीरतीरे, नदीपदस्य नदीतीरे इत्यर्थ:। गभीरनदीतीरबोधनापत्तेरित्यर्थ:। अत एव समुदाये लक्षणास्वीकारादेव।

**उक्तं यथा कलाटीकायाम्-**

उक्तमतानां मध्ये मतद्वयं न युक्तं किन्त्वाद्यमेवेति सूचयितुं तत्र शक्येत्यत्र ज्ञाप्येति निवेश्य तदेव परिष्कुर्वतां व्यपेक्षादिवादिनां मत-माह केचित्त्विति। तदनुपपत्तिज्ञान-पूर्वकस्वज्ञाप्यत्वेन गृहीतप्रसिद्धार्थ-सम्बन्धज्ञानेनेत्यर्थ:।

**रत्नप्रभायाम् -**

'शक्यसम्बन्धो लक्षणा' इति स्वीकारे वाक्ये लक्षणा न सम्भवति तत्र शक्तेरभावादिति मीमांसकमतमाह- केचित्त्विति-'स्वज्ञाप्यस-म्बन्धो लक्षणा'। एवञ्च वाक्यार्थस्यापि वाक्यज्ञाप्यत्वात् तत्र लक्षणा सिध्यतीति भाव:। ''गभीरायां नद्यां घोष:'' – शक्यसम्बन्धरूप-

लक्षणास्वीकारेऽत्र सा न स्यादिति भाव:। नामार्थयोरभेदान्वयेन 'गभीरतीराभिन्नं यन्नदीतीरं तत्र घोष:' इत्येव बोध: स्यान्न तु 'गभीराभिन्ना या नदीतत्तीरे घोष:' इति। यत्तु 'गभीर' पदं 'नदी' पदञ्चोभयमपि गभीरत्वविशिष्टनदीतीरलक्षकम्। तदा एकपदार्थप्रत्य-येऽपरपदं तात्पर्यग्राहकमिति, तन्न, कस्य लक्षकत्वं कस्य तात्पर्य्य-ग्राहकत्वमित्यत्र विनिगमनाविरहात्, समुदायशक्तौ पर्यवसाने लक्षणाया एव न्याय्यत्वाच्च।

**निष्कर्ष:**

उभयो टीकयो: 'स्वज्ञाप्यसम्बन्धो लक्षणा' इति मन्यते। 'गभीरायां नद्यां घोष:' अत्र गभीरनदीपदयो: य: समुदायस्तेन बोध्य: ज्ञाप्य: गभीरत्वविशिष्टा निम्नत्वधर्मपरिचायिता नदी एव पदार्थ: पदस्यार्थ:, गभीरत्वविशिष्टनदी पदार्थेन सह सम्बन्ध: लक्षणा इति माध्यमेन पदमात्रविषयत्वेन सह वाक्यार्थेऽपि लक्षणा स्वीकरोति।

**अयमभिप्राय:**

वाक्यविशेषे शक्त्यभावात् शक्त्यभावप्रयुक्तलक्षणापि ग्रहीतुं नैव शक्यते। यदि पदसमूहात्मकवाक्ये लक्षणा नाभ्युपेयते चेत् तर्हि चित्रगोस्वामीत्याद्यात्मकबोधक: चित्रगुशब्द: तस्मात् नानारूपवि-शिष्टगोस्वामीत्यादे: अन्वयबोध: नानुपपन:। ''चित्रगु'' वाक्यान्तर्गत चित्रपदे गो पदे वा तादृशार्थकविशिष्टे लक्षणाया: अभ्युपगते सति अपरपदस्य व्यर्थत्वेन पर्यवसितत्वमिति, अर्थात् चित्रगु इत्यत्र समुदाये लक्षणा अवश्यमभ्युपेयेति।

ननु ''चित्रगु'' इति समस्तवाक्यस्य शक्तिशून्यत्वेऽपि लक्षणा भवत्येव। यत: शक्त्यभावप्रयुक्तलक्षणाभावेति यदुच्यते तत्तु समासव्यतिरिक्तस्थले एव न तु समासस्थले, इति चेन्नायदि समास-व्यतिरिक्तस्थले लक्षणा नाभ्युपेयते चेत् तर्हि ''गभीरायां नद्यां घोष: प्रतिवसति'' एतद् वाक्यान्तर्गत ''गभीरायां नद्याम्'' इति खण्डवाक्ये लक्षणा नैव सम्भवति, अर्थात् तादृशवाक्यात् ''गभीरनदीतीर-विषयकान्वयबोधस्यानुपपत्ति:। एवं च विरोधिपक्षावलम्बिभिरुच्यते ''गभीरायां नद्याम्'' एतद्वाक्यघटकनदीपदस्य गभीरनदीतीररूपार्थे लाक्षणिकत्वं कल्प्यते चेत् तदपि न साधुतां संगच्छते। यत: नदीपदस्य यो हि लाक्षणिकार्थ: गभीरनदीतीरं तत्र गभीरपदार्थस्य अभेदसम्बन्धेन नान्वय: ''स्वसमानविभक्तिकेन पदेनोपस्थापितस्यैव संसर्गमर्यादया भानम्।''

तीरे गभीरत्वाभावात्। अत: गभीरनदीतीरे अभेदसम्बन्धेन गभीरपदार्थस्य अन्वय: नैव सम्भवति। यद्युच्यते गभीरपदस्यैव गभीरनदीतीररूपार्थे लक्षणा कल्प्यते तदपि न साधु। यत: एतादृशीलक्षणाऽभ्युपगमे सति यो हि लाक्षणिकार्थ: गभीरनदी-तीरमिति तत्र तेन सह ''नद्यां'' इत्यंशस्य अन्वयोऽभ्युपेय इति। परन्तु तत् कण्यापि शास्त्रदिशा नैव सम्भवति। यत: नद्यां तीरत्वधर्माभावात् तादृशपदार्थस्य अभेदसम्बन्धेन नदीपदार्थस्य बाधितत्वमेव। अर्थात् अयोग्यवाक्यत्वाद् ''गभीरायां नद्याम्'' एतद्वाक्याधीनवाक्यार्थ-विषयकबोध: नैव सम्भवति। यत: तीरं कदापि नदी एव नास्ति। एवञ्च ''गभीरायां नद्याम्'' अथवा ''चित्रगु'' इत्यादिवाक्यान्तर्गतस्य कस्यापि पदस्य लाक्षणित्वकल्पे तादृशवाक्यजनितान्वयबोधस्य अनुपपद्यमानत्वाद् उपसंहारे मीमांसका: स्वाभिमतं प्रकटयन्ति यत् यदि ''गभीरायां नद्याम्'' ''चित्रगु:'' इत्यादि समस्तवाक्ये लक्षणा नाभ्युपेयते चेत् तर्हि तादृशवाक्याद् उपर्युक्तवाक्यार्थबोधस्य नैवोप-पत्ति:, इत्यत: तादृशबोधस्योपपत्त्यर्थं चित्रगुरिति वाक्यस्य चित्रगो-स्वामिरूपार्थे ''गभीरायां नद्याम्'' इति वाक्यस्य च गभीरनदीतीर-रूपेऽर्थे लक्षणा स्वीकर्तव्या इति तेषामभिप्राय:।

**अपभ्रंशेष्वपि लक्षणोपपत्ति:-**

नन्वेवमपभ्रंशेऽपि ज्ञाप्यसम्बन्धसत्त्वाल्लक्षणापत्ति:, शक्यसम्बन्धस्य लक्षणात्वे तु न तत्र लक्षणा, शक्तेरभावेन शक्यार्थाभावादिति तार्किकमतं खण्डयन्नाह - ''अपभ्रंशेष्वपि लक्षणा इष्टैव अत एव लक्ष्यस्य व्यञ्जकतायाम्'' -

**साहेन्ती सहि सुहअं खणे खणो दूम्मिआससि मज्जकए।**

**सब्भावणेह करणिज्जससिसअं दाव विरइमं तुमए।।**

इत्याद्युहारणं प्रकाशकौरर्दत्तम्, तस्यापि शक्तत्वाच्च। ज्ञायकत्वञ्च 'अर्थबोधकताप्रयाप्त्यधिकरणत्वम्' इति न प्रत्येकं वर्णेषु सा। लक्ष्यताऽवच्छेदकत्ववल्ल-क्षकताऽवच्छेदकत्वस्यापि गुरुभूतायां पदघटितानुपूर्व्यां स्वीकारे बाधकाभाव:।

**अत्रकलाकृतस्तु -**

नन्वेवमपभ्रंशेऽपि लक्षणापत्तिः, पूर्वमते तु न, तस्यावाचकत्वादत आह- अपेति। तदशक्तत्ववादिनां पूर्वमतेन स्यादित्यनिष्ट-मेवेति, तत इदमेव वरमिति वैलक्षण्यसूचकस्तु। तत्र सम्मतिं विषये साहेन्तीति- अपभ्रंशस्यापीत्यर्थस्य दुर्वारैवेतिभाव:। ज्ञाप्यत्वस्य स्वनिष्ठज्ञापकता निरूपितत्वादिति भाव:।

**रत्नप्रभायाम् -**

'अपभ्रंशेऽपि शक्ते: साधितत्वादितिभाव:। अपभ्रंशे लक्षणास्वीकारादेव, व्यञ्जना लक्ष्यार्थनिष्ठाऽपीत्यत्रेत्यर्थ:। साहेन्तीति -

**''साहेन्ती सहि सुहअं खणे खणे दूम्मिआसि मज्जकए।**

**सब्भाव-णेह करणिज्जसरिसअं दाव विरइअं तुमए।।''**

**साधयन्ती सखि! सुभगं ज्ञणे ज्ञणे दूनासि मत्कृते।**

**सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया।। इति संस्कृतम्।।**

अर्थात् मदर्थं नायकं वशीकुर्वती त्वम् हे सखि! क्षणे क्षणे दूनासि = दु:खी भवसि। सद्भावस्नेहाभ्यां यत् करणीयं तत् त्वयां कृतमित्यर्थ:। अत्र 'मत्पतिना सह रमणं कृतम्' इति लक्षणया बोध्यते। लक्ष्यार्थतश्च 'शत्रुत्वमाचरितम्' इति व्यज्यते। अपभ्रंशे लक्षणाया अभावे उदाहरणमिदं विरुध्येतेति भाव:। यत्तु ज्ञाप्यत्वम् न 'स्वजन्यबोधविष-यत्वम्', आकाशस्यापि समवायेन स्वाश्रयतया घटपदजन्यबोधविषयत्वेन घटादिपदज्ञाप्यत्वा-पत्ते:। न च 'स्वजन्यशाब्दबोधविषयत्वम्' तद्, 'गङ्गायांघोष:' इत्यत्र प्रवाहस्य शाब्दबोधाविषयत्वेन लक्षणाऽनापत्ते:। तस्माच्छक्तया स्वजन्यबोधविषयत्वमेव ग्राहयमिति, तन्न स्वजन्यशाब्दबोधविषयत्वस्यैव तत्त्वात्।

'गङ्गायां घोष:' इत्यत्र प्रवाहसम्बन्धित्वेनैव तीरबोधेनादोषात्। अपभ्रंशस्यापीत्यर्थ:। 'गभीरायां नद्यां घोष:' इत्यादौ गुरुभूतस्यापि 'गभीराभिन्न् नदीतीरत्वरूपधर्मस्य यथा लक्ष्यताऽवच्छेदकत्वं तथा गुरुभूताया अपि वाक्यगताऽनुपूर्व्या लक्षकताऽवच्छेकत्वं फलबलात् स्वीक्रियते।

वाक्ये लक्षणायां तार्किकसम्मतिः - वाक्ये लक्षणास्वीकारादेव। 'छत्रिणो यान्ति' इति तार्किकमते प्रकृतौ प्रत्यये च शक्तिर्न तु समुदाये, तथा च 'छत्र' शब्दाद् 'इनि' प्रत्यये 'छत्री' इति प्रकृतिप्रत्ययसमुदायरूपं तत्र च शक्तेरभावाच्छक्यसम्बन्धरूपलक्षणा न सम्भवति, ज्ञाप्यसम्बन्ध रूपलक्षणा स्वीकारे तु 'छत्री' इति समुदायज्ञाप्यच्छत्रविशिष्टरू-पार्थस्य सार्थवाहेस्वघटितत्वरूपसम्बन्धसत्त्वात् तत्र लक्षणा सिध्यतीतिभाव:। समासादिवृत्तौ शक्तिमङ्गी-कुर्वतां मते तु शक्य- (ननु शक्यसम्बन्धरूपलक्षणास्वीकर्तृनये 'छत्रिणो यान्ति' इत्यत्र लक्षणा न स्यात् तन्मते प्रकृतिप्रत्ययसमुदाये शक्तेरभावादिति चेत्, न छत्रपदस्यैकसार्थवाहे लक्षणा, तद्धितार्थश्चात्र सम्बन्ध: तथा चैकसार्थवाहसम्बन्धवन्त: छत्रिणोऽच्छत्रिणश्च गच्छन्तीत्यर्थेनादोषात्। सम्बन्धस्यापि सत्त्वान्नदोष:।

**निष्कर्ष:**

उभयो: टीकयो अपभ्रंशेऽपि स्वीकृता तथा च 'साहेन्तीति' इति माध्यमेन स्पष्टीकृता ज्ञाप्यसम्बन्धरूप लक्षणा इति।

शक्यसम्बन्धरूपलक्षणा स्वीकर्तृणां न्यायविदां नये तु छत्रिणो यान्ति इत्यत्र लक्षणाया: कथं प्रसर:? प्रकृतिप्रत्ययसमुदाये शक्तेरभावादिति चेदुच्यते छत्रपदस्य एकसार्थवाहे लक्षणा, तद्धिवार्थश्चात्र सम्बन्ध:, तथा च एकसार्थवाहसम्बन्धवन्त: छत्रिणोऽच्छत्रिणश्च गच्छन्ति इत्यर्थेन समन्वयो बोध्य:।

एकसार्थवाहित्वमेव लक्ष्यताऽऽवच्छेदकं न तु एकसार्थगन्तृ-त्वम्। गमने निराकाङ्क्षतया यान्तीत्यस्यस्यानर्थक्यापत्ते:। ज्ञाप्य-सम्बन्धश्चात्र स्वारब्धत्वे सति एव विरोध्यारब्धत्वम्। नव्यास्तु हनि प्रत्ययस्येव लक्षणा छत्रपदं तात्पर्यग्राहकमिति वदन्ति। शक्यसम्बन्धस्य लक्षणात्वमनया रीत्या सुतरां सम्पद्यते। स्वघटितत्वरूपसम्बन्ध-स्वीकारेऽपि सत्त्वात्।

ज्ञाप्यसम्बन्धो लक्षणेति पक्षे ज्ञाप्यता व्यापारजन्यज्ञानविषयता। तत्र शक्तिरूपो व्यापार: पदनिष्ठस्तन्निष्ठजनकता निरूपितजन्यतावज्ज्ञानम्, तत्र जनकताज्ञानजनकतेव, सैव न ज्ञापकता एवं च प्रथमोपस्थिततत्वात् तत्रैव ज्ञानस्वरूपे निरूपणम्।

अत्रापपाठ एव समीचीन: पाठ: स एव तु रत्नप्रभाकारेण दूषित इत्यहो आश्चर्यम्।

तेन - न समवायेन घटादिपदज्ञाप्यकाशसम्बन्धिनोऽपि उपस्थितस्य शाब्दबोधविषयत्वम् इति त्वपपाठ:, अर्थासंगतेरित्युपाध्याया: इत्येवं लिखितम्। तत्रोच्यते- स्वज्ञाप्यसम्बन्ध इत्यत्र स्वनिष्ठज्ञापकतानिरूपित ज्ञाप्यतावत्सम्बन्ध:। तत्र च ज्ञापकता ज्ञानजनकता, ज्ञाप्यता तु ज्ञानविषयता। अत्र ज्ञानं शाब्दोबोधात्मकमेव।

एवं च घटपदनिष्ठज्ञानजनकतानिरूपितज्ञानविषयतावदाकाशसम्बन्धश्चन्द्रे सूर्ये पटादिशब्दे वा तद्रूपलक्षणयोपस्थितचन्द्रादीनां न शाब्दविषयत्वमिति हद्यम्। मूले तु घटादिपदज्ञाप्याकाशस्य न शाब्दविषयत्वमिति यदुक्तम्, तत्तु अस्वारसिकमेवेति विचार्यतां सुधीभि:।

**मीमांसकमतखण्डनम्**

अस्यायमाशय: - शाब्दिकास्तु समासातिरिक्तस्थले निपात-भिन्ननामार्थद्वयस्य आधेयत्वादिभेदसम्बन्धेनान्वयं नाभ्युपगच्छन्ति। अतएव वाक्ये यदि लक्षणा अभ्युपेयते तर्हि ''गभीरायां नद्याम्'' इत्याकारकवाक्यस्य गभीरनदीतीररूपेऽर्थे लक्षणा कल्पनीया, तथा सति उक्तवाक्यसमभिव्याहृतघोषपदार्थे तादृशलक्ष्यार्थस्य आधेयत्व-सम्बन्धेन नान्वय:, यत: घोषपदार्थे तादृशलक्ष्यार्थस्य अभेदसम्बन्धे-नान्वय: कर्तव्य इति, अथ च तादृशतीररूपार्थस्य अभेदसम्बन्धेन घोषपदार्थे बाधितत्वात् अभेदसम्बन्धेनापि अन्वय: न रुचिकर: प्रतिभाति। समासभिन्नस्थले नामार्थद्वयस्य अन्वयाऽव्युत्पन्नत्वात्। प्रकृतस्थले च गभीरनदीतीररूपो यो हि लक्ष्यार्थ: तस्य ''गभीरायां नद्याम्'' एतद्वाक्याधीनवाक्यार्थस्य नामार्थत्वं मीमांसाकैरपि अभ्युपगंतव्यमिति। अर्थात् घोषपदार्थे तादृशनामार्थस्य आधेयत्व-सम्बन्धेन नान्वयबोध:। समासादन्यत्र इत्यंशस्य प्रयोजनं परिष्करोति जगदीश:- ''राज्ञ: पुरुष:'' ''राजपुरुष:'' इत्याकारकसमास: व्यासो वा वाक्यस्थले समानार्थकान्वबोधानुरोधेन ''राज्ञ: पुरुष:'' इत्यत्र यथा षष्ठीविभक्त्यर्थ: स्वत्वसम्बन्ध: गृह्यते तथैव ''राजपुरुष:'' इति समासस्थले च राजस्वत्वरूपसम्बन्धे लक्षणास्वीकरणात् ''राजसम्बन्धवान् पुरुष:'' इत्याकारकान्वयबोधस्योपपत्तिरिति। यदि मीमांसका: प्रवदन्ति ''गभीरायां नद्याम्'' एतद्वाक्यस्थले गभीरनदीतीरवृत्तौ उक्त सप्तम्यन्तवाक्यस्य लक्षणा अभ्युपेयते तथा सति गंगातीरवृत्यात्मक: यो हि लक्ष्यार्थ: तस्य घोषपदार्थे अभेदे नान्वयबोध: सम्भवतीत्यपि वक्तुं नैव पार्यते। यत: ''समासभिन्नस्थले नामार्थद्वयस्य अभेदेनान्वयबुद्धित्वावच्छिन्नं प्रति नामद्वये समानविभक्तिकत्वस्य नियामकत्वम्''।

''नीलघट:'' ''नीलोत्पलम्'' इत्यत्र समासान्तर्गतघटपदार्थे उत्पलपदार्थे वा नीलपदार्थस्य अभेदसम्बन्धेनान्वयबोध:। उक्तसमास-घटकपदद्वयस्य समानविभक्तिकत्वाभावेऽपि तादृशबोधस्याभ्युपगतत्वात् समासभिन्नेति विशेषणम्।

ननु ''गभीरायां नद्याम्'' इत्यत्र सप्तम्यन्तवाक्यस्य लक्षणास्वीकारपक्षे पूर्वोक्तदोषत्वेऽपि सप्तमीविभक्तिं परित्यज्य ''गभीरायां नदी'' इत्यंशस्य लक्षणा कल्पनीयेति चेन्न- यत् ''प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्'' इति नियमानुसारेण सप्तमीविभक्त्यर्थस्य आधेयत्वस्य गभीरनदीतीररूपलक्ष्यार्थे नान्वय:। उच्यते जगदीशै: - ''न हि स भाग: प्रकृति:''। अर्थात् नदीपदस्य सप्तमीविभक्ते: प्रकृतित्वेऽपि ''गभीरायां नदी'' इति समुदायस्य न प्रकृति:, सुतराम्, उक्तसमुदायांशस्य यो हि लक्ष्यार्थ: गभीरनदीतीरं तस्य आधेयताया सह नान्वय इति, गभीरायां नदी'' इत्यंशस्य प्रकृतिलक्षणानाक्रान्तत्वात् नैव तस्य प्रकृतित्वम्।

''स्वोपस्थाप्ययादृयार्थान्वियबोधं प्रति स्वाव्यवहितोत्तरसम्बन्धेन यादृशशब्दनिश्च-यो हेतुस्तादृशशब्दस्यैव तादृशार्थे प्रकृतित्त्वादित्याशय:।''

यदि ''गभीरायां नदी'' इत्यंशस्य ''कण्ठेकाल:'' इति शब्दस्य तुल्यप्रकृतित्वमभ्युपेयते चेत् तर्हि ''गभीरायां नदीं व्रज'' एतस्माद्वाक्यादपि गभीरनदीतीरगतकर्मत्वबोधस्यापत्ति: स्यात्। तात्पर्यास्तु - मीमांसकै: वाक्ये लक्षणाया अभ्युपगतत्वात् ''गभीरायां नद्याम्'' इत्यत्र यदि सप्तम्यन्तगभीरापदसहकृतनदीभागस्य गभीरनदीतीररूपार्थे लक्षणाऽभ्युपेयते तर्हि ''गभीरायां नदीं'' इत्यत्र अमविभक्त्यर्थकर्मतया सह तादृशतीररूपलाक्षणिकार्थस्य अन्वय-बोधापत्ति: स्यात्। वस्तुत: तादृशान्वबोध: मीमांसकानां नैयायिकानां च नये अनुभवविरुद्ध:। एवञ्च ''गभीरायां नदी'' इति भागस्यापि वाक्यत्वमपि नास्ति यत: साकांक्षपदसमूह: वाक्यमिति। ''गभीरायां नदी'' इत्यंशघटकपदसमूहस्य मिथ: साकांक्षत्वाभावात् वाक्यत्वं नास्ति। अर्थात् तत्र वाक्यत्वाभावात् निराकांक्षपदसमूहे मीमांसकनये लक्षणा नास्ति।

''गभीरायां नद्यां घोष:'' इत्यत्र गभीरनदीतीररूपार्थे यदि ''गभीरायां नद्यां'' इति वाक्यस्य लक्षणा नाभ्युपेयते चेत् तर्हि तादृशवाक्याधीनगभीरनदीतीरवृत्तिघोषविषयकान्वयबोधस्य कथमुत्पत्ति:, इत्याकांक्षाया-मुच्यते जगदीशाचार्यै: ''गभीरयां नद्यां घोष:'' एतद्वाक्यान्तर्गतगभीरपदस्य नदीपदस्य वा गभीरनदीतीररूपार्थे लक्षणा अभ्युपेया। वाक्ये शक्त्यभावत्वेऽपि वाक्यान्तर्गतानां प्रत्येक-पदानां सत्यां भिन्नशक्तौ मणिकारसम्मतशक्यसम्बन्धरूपलक्षणा गभीरपदे नदीपदे वा अवश्यमभ्युपेया। तस्माद् गभीरपदं नदीपदं वा तत्र गभीरनदीतीरलक्षकं पदान्तरन्तु तत्र तात्पर्यग्राहकमिति सिद्धान्तविद:।

**मणिकारमते लक्षणालक्षणं तत्खण्डनञ्च-**

चिन्तामणिकारास्तु तन्निरुपितशक्तिशून्यत्वे सति तत्सम्बन्धि-तमेव लक्षणेति प्रवदन्ति, तन्न रुचिकरं प्रतिभाति यत: ''गंगायां घोष:'' इत्यत्र तीरनिरूपितशक्तिशून्यत्वे सति तीरसम्बन्धि-शक्तत्वरुपा या गंगापदनिष्ठा लक्षणा तल्लक्षणान्तर्गतविशेष्यदलांशे शक्तत्वपदं यदि अनिवेश्य केवलं सम्बन्धित्वमात्रमभ्युपेयेते चेत् तर्हि गंगापदस्य तीररुपार्थे लक्षणाया: स्वरुपं भवति तीरनिरुपितशक्ति-शून्यत्वे सति तीरसम्बन्धित्वं

तादृशतीरसम्बन्धित्वरूपालक्षणास्वीकारे च कालिकादिसम्बन्धेन तादृशतीरसम्बन्धि-त्वपुरस्कारेण गृहीतगंगापदात् तीरादिविषयकोपस्थित्या ''गंगातीरवृत्तिर्घोष:'' इत्याकारकान्वयबोधस्य प्रसक्ति:। वस्तुत तादृशसम्बन्धित्वपुरस्कारेण गंगापदज्ञानात् नैव गंगातीरादिविषयकान्वयबोध:, अत: तादृशतीरसम्बन्धि ''गंगापदम्'' इत्यस्मात् ज्ञानात् गंगातीरविषयकान्वयबोधम् अपाकर्तुं सम्बन्धित्वमुपेक्ष्य सम्बन्धिशक्तत्वमित्यभ्युपगतम्।

अन्यदपि उल्लिख्यते यत् ''गंगायां घोष:'' इत्यादौ सप्तम्यन्तगंगापदे यथा तीरप्रतियोगिककालिकादिसम्बन्धस्य विद्यमानत्वं तथैव ''गंगा गंगायां घोष:'' इत्यत्रापि तादृशसम्बन्धस्य विद्यमानत्वाद् ''गंगायां घोष:'' इत्यादिवद् अत्रापि लक्षणाया: प्रसक्ति: स्यात्। इष्टापत्तिरपि वक्तुं नैव शक्यते- यत: न्यायसिद्धा-न्तानुसारेण वाक्ये शक्त्यभावात् तत्र लक्षणास्वीकारे मानाभाव:। एवञ्च यदि गंगा गंगायामित्यत्र लक्षणाअभ्युपेयते चेद् एकस्य गंगापदस्य व्यर्थतानिबन्धनेन अपार्थकनिग्रहस्थानप्रयुक्तोक्तवाक्यस्य न शाब्दबोधजनकत्वमिति।''

यद्युच्यते- तीरादिनिरूपितशक्तिशून्यत्वे सति तीरबोधेच्छया उच्चरितत्वं, तीरादिनिरूपितशक्तिशून्यत्वे सति तीरादिपरत्वं, तीरादिनिरूपितशक्तिशून्यत्वे सति तीरादिसम्बन्ध्यनुभवजनकत्वमेव वा लक्षणा तर्हि कदाचित् तीरविषयकबोधेच्छावशत उच्चरिते गाछ माछ इत्यादि शब्दे तीरादिनिरूपितशक्तिशून्यत्वसमानाधि-करणतीरादिगोचरप्रतीतीच्छाप्रयुक्तोच्चरितत्वरूपतीरादिपरत्वम् एवं च तीरादिनिरूपित-शक्तिशून्यत्वसमानाधिकरणतीरादिसम्बन्धिवृक्षादिविषयकानुभवजनकत्वरूपाया: लक्षणाया: विद्यमानत्वाद् तीररूपार्थे गाछ माछादिपदस्य लक्षणाया: प्रसक्ति: प्रसक्ति: स्यात्। अत: गाछ माछ इत्यादि अपभ्रंशेशब्दे लक्षणाया: या प्रसक्ति: तद्वारणाय तीरादिनिरूपितशक्तिशून्यत्वसमानाधिकरणतीरादिपरत्वं तादृशतीरादिसम्बन्ध्यनुभवज-नकत्वं च परित्यज्य तीरादिनिरूपितशक्तिशून्यत्वे सति तीरादिसम्बन्धिशक्तत्वरूपा लक्षणा अभ्युपेया इति। तथा च गाछ माछ इत्यादि अपभ्रंशे शब्दे तादृशशक्तत्वरूपा लक्षणाया अविद्यामानत्वाद् नैवातिप्रसक्तिरिति।

अपभ्रंशशब्दे लाक्षणिकत्वाभ्युपगमे इष्टापत्तिरपि वक्तुं नैव शक्यते। तदभ्युपगमे सति गाछ माछ इत्यादिशब्दस्स्य साधुत्वापति:। एतदभिप्रायेण जगदीशाचार्य: प्राह -

''न चेष्टापत्ति: शक्तिलक्षणान्यतरवृत्तिमत्वे तस्य साधुत्वापत्ते:, पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात्।''

**शब्दशक्तिप्रकाशिकाकृतस्तु लक्षणालक्षणे तद्विभागे च**

''गंगायां घोष:'' इत्यत्र गंगापदस्य जलप्रवाहरूपशक्यार्थस्य गृहीतत्वेऽपि उक्तवाक्यार्थस्य घोषपदार्थेनान्वय:। सुतरां शक्यार्थस्य अन्वयानुपपत्ति: तात्पर्यानुपपत्तिर्वा भवतीति गंगापदस्य गंगातीर-रूपार्थे लाक्षणिकत्वमभ्युपेयते। वस्तुत: स्थलविशेषे अन्वयानुप-पत्तिज्ञानाद् लक्षणाया: प्रतीयमानत्वेऽपि ''यष्टी: प्रवेशय:'' इत्यत्र यष्टिपदस्य शक्यार्थे गृहीतेऽपि यष्टिपदार्थेन सह प्रवेशनक्रियाया: नान्वयानुपपत्ति:। यत: यष्टिपदशक्यार्थस्य प्रवेशक्रियासम्भवात्। एवञ्च ''यष्टी: प्रवेशय:' इत्यत्र तादृशशक्यार्थगृहीते सति न भोजनतात्पर्यस्योपपत्ति: इत्यत: यष्टिपदस्य यष्टिधरे लक्षणा अभ्युपेया। अर्थात् सर्वत्र तात्पर्यानुपपत्तिरेव लक्षणाया: बीजमित्यभ्युपगन्त-व्यमिति।

एवञ्च यदि अन्वयानुपपत्तिरेव लक्षणाया: बीजत्वमभ्युपेयते चेत् तर्हि ''गंगायां घोष:'' इत्यत्र कदापि गंगापदस्य तीरे कदापि गंगापदस्य तीरे कदापि च घोषपदस्य मत्स्यादौ या लक्षणाऽभ्युपगता अस्ति इति तन्नियमस्य व्याहतत्वमित्यत: तात्पर्यानुपपत्तिज्ञानं लक्षणाया: बीजमिति। सा च लक्षणा जहत्स्वार्थादिभेदेन विविधेति अग्रे स्फुटीभविष्यति।

मणिकारसम्मतम् अन्येषां च दार्शनिकसम्मतलक्षणालक्षणस्यातिव्याप्त्यव्याप्तिभ-येन लक्षणाया: निष्कृष्टलक्षणमुच्यते जगदीशभट्टाचार्यै: -

**यादृशार्थस्य सम्बन्धवति शक्तन्तु यद्भवेत्।**
**तत्र तल्लक्षकं नाम, तच्छक्तिविधुरं यदि।।**

तात्पर्यास्तु - ''यादृशानुपूर्व्यवच्छिन्नं (नाम) यद्धर्मविशिष्टनिरूपितशक्तिशून्यत्वे सति यद्धर्मविशिष्टयन्निरूपितसम्बन्धवन्निरूपितशक्तिनिरूपकं, तद्धर्मप्रकारकतद्विशेष्यक-बोधे तादृशानुपूर्व्यवच्छिन्नं (नाम) लक्षकमिति।''

लक्षणालक्षणे सत्यन्तदलं नैव निवेश्यते तर्हि नानार्थकसैन्धवादिपदस्य लवणार्थसम्बन्धो यो हि तुरगपदार्थ: तत्र शक्तत्वात् सैन्धवपदे लाक्षणिकपद-लक्षणस्यातिव्याप्ति:। तदतिव्याप्ते: परिहारार्थं सत्यन्तदलस्य उपयोगित्वम्। ''गंगायां घोष:'' इत्यत्र

घोषादिपदसमभि-व्याहृतगंगादिपदे यथा तीरनिरूपितशक्तिशून्यत्वं तथैव तीरसम्बन्धी यो हि जलप्रवाह: तन्निरूपितशक्तिमत्त्वस्य गृहीतत्वात् लक्षणसमन्वय:।

जहत्स्वार्थ-अजहत्स्वार्थ-निरूढ-आधुनिकादि भेदेन लक्षणा विविधेति।

**जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिकादिका:।**
**लक्षणा विविधास्ताभिर्लक्षक: स्यादनेकधा।।**

य: लाक्षणिकशब्द: स्वशक्यार्थं परित्यज्य केवलं लाक्षणिकार्थस्य बोधक:, तादृशशब्दगता लक्षणा जहत्स्वार्थलक्षणेति, यथा ''गंगायां घोष:'' इत्यत्र गंगापदं स्वशक्यार्थजलप्रवाहरूपार्थं परित्यज्य लक्षणया तीररूपार्थं बोधयति। अत: तीररूपार्थे गंगापदगता लक्षणा जहत्स्वार्थलक्षणेति।

''काचिल्ललक्षणा शक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्यु-च्यते । यथा तीरत्वादिना गंगापदस्य।''

य: शब्द: स्वशक्यार्थमपरित्यज्य शक्यार्थस्य लक्ष्यार्थस्य च बोधक: भवति तादृशशब्दगता लक्षणा अजहत्स्वार्थलक्षणेति। यथा ''छत्रिणो गच्छन्ति'' इत्यत्र एकस्वार्थवाहित्वरूपानुगतलक्ष्यताव-च्छेदकधर्मपुरस्कारेण छत्री यथा प्रतीयमान: भवति तथैव तद्भिन्नानां प्रतीतिर्भवति। अत: छत्रपदगता लक्षणा अजहत्स्वार्थ लक्षणेति।

''आदित्यो वै यूप:'' ''आयुर्वै घृतम्'' इत्यादि श्रौतवाक्ये आदित्यपदस्य आदित्यसृदशरूपार्थे एवं च आयुस्पदस्य आयुर्जनकरूपार्थे या आदित्यपदगता आयुस्पदगता वा लक्षणा गौणीलक्षणेति।

''नीलो घट:'' इत्यत्र नीलपदस्य नीलविशिष्टरूपार्थे या लक्षणा गृह्यते सा लक्षणा निरूढा इति। इयं निरूढा लक्षणा आधुनिक-लक्षणारूपेण शास्त्रे अभिहिता एव। वस्तुत: अनादितात्पर्यवतीलक्षणा निरूढा आजानिकेति वा।

**आधुनिकलक्षणा -**

''पटेन जलमाहर'' इत्यत्र पटपदस्य घटरूपार्थे या लक्षणा सा तु आधुनिकेति। मूलोक्तादिपदेन द्विरेफपदस्य भ्रमररूपार्थं परम्परासम्बन्धरूपालक्षितलक्षणेति। वेदान्तिनस्तु ''तत्त्वमसि'' वाक्याद् अखण्ड-चिन्मात्रबोधानुकूल ''तत्'' ''त्वम्'' वा पदस्य चिन्मात्रतात्पर्ये जहदजहत्स्वार्थनाम्रा एका लक्षणा अभ्युपगन्तव्या इति प्रवदन्ति। तत्तु नैयायिका: नाभ्युपगच्छन्ति। यत: न्यायनये पूर्वोक्तश्रुतिवाक्यं नैव अखण्डचिन्मात्रस्य बोधकं, किन्तु ''निरञ्जन: परमं साम्यमुपैति'' इत्यादि श्रुत्या सह सामञ्जस्यानुरोधेन ''तत्त्वमसि'' इत्यत्र ''त्वम्'' पदं शक्यार्थबीजस्य बोधकम्, परमात्मबोधकं तत् पदञ्च परमात्मसदृशार्थे लाक्षणिकमिति। निर्दु:खत्वादिधर्मपुरस्कारेण जीव: ईश्वरसदृश: भवतीति श्रुतितात्पर्यमिति। अर्थात् ''तत्त्वमसि'' इत्यत्र ईश्वरसदृशरूपार्थे तत्पदगतालक्षणा गौणीलक्षणेति अभ्युपगन्तव्या। ''काचिच्च पूर्वपूर्वं ताद्रूप्येणाप्रत्यायकत्वादाधुनिकी।''

**शक्यताऽवच्छेदकारोप एव लक्षणा-** सामीप्यादिसम्बन्धमूलक-शक्यताऽवच्छेदकारोप एव लक्षणा। तथा च 'गङ्गा' पदशक्यताऽवच्छेदकप्रवाहविशेषत्वस्य तीरे आरोपात् तीरस्यापि प्रवाहविशेषत्वेनैव बोध इति भाव:। तदुक्तं हरिणा : -

**'अर्थमात्रं विपर्य्यस्तं शब्द: स्वार्थेनव्यवस्थित:'**

एवञ्च शक्त्यैव बोधान्न लक्षणाप्रयुक्तकार्यकारणभावान्तरं कल्पनीयम्।

**उक्त यथा मूले लघुमञ्जूषायां -**

''परे तु आरोपितशक्यताऽवच्छेदकरूपेण शक्त्यैव तत् पदवा-च्यत्वेन प्रसिद्धान्यव्यक्तिबोधे, व्यक्तिविशेषबोधे वा लक्षणेति व्यवहार:। 'छत्रिणो यान्ति' इत्यादाव-प्यच्छत्रिषु साहचर्याच्छत्रित्वारोप:। 'काकेभ्यो दधि' इत्यादावपि दध्युपघातकमात्रे काकत्वारोप:।

'कमलानि कमलानि' इत्यादौ कमलत्वेनैव व्यक्तिविशेषबोध:।

''त्वामस्मि वच्मि'' इत्यादौ सम्बोध्यत्वादिनैवोपदेश्यत्वाद्यवस्थावि-शिष्टतत्तद् व्यक्तिबोधो लक्षणया।'' अत्र पौनरुक्तयाद् विशेषानाधायकत्वाद्वा तात्पर्यानुपपत्ति:, सामान्यविशेषभाव: सम्बन्ध:।

अत्र कुञ्चिकाकृतस्तु - वाच्यत्वेन प्रसिद्धो य: प्रवाहस्तद्भिन्नस्य तीरस्य प्रवाहत्वरूपेण शक्त्यैव बोध इत्यर्थ:। प्रवाहत्वमेव तीरे आरोप्यत इति भाव:।

**उक्तं यथा कलाटीकायाम् -**

बोधस्त्वयं धर्मधर्मितावच्छेदकीकृत्य शक्तिग्रहस्तदारोपेण। शक्त्यैव सर्वत्र शक्तिग्रहोपस्थितिशाब्दबोधानां समानप्रकारकत्वेन कार्यकारणभावान्नात्र शक्तिग्रहापेक्षा नाप्यतिप्रसङ्गः। एवञ्च न पृथ-क्कार्यकारणभावादिकल्पनमपि। तदारोपे च शक्यसम्बन्धो लक्षणे-त्यप्युपपन्नम्। एतेन तस्या अतिरिक्तत्वनिरास इति भाव:। आरोपे बीजं दर्शयति -

'छत्रिणो यान्ति' इत्यादि। अनेनासम्भवो वारित:। अपि: प्रसिद्धस्य गङ्गायां घोष इत्यस्य समुच्चायक:। अत एव तत्त्याग:। मात्रं कात्स्न्र्ये। 'काकेभ्यो दधि' काकभिन्ने इत्यर्थ:। दध्युपघातकत्वसादृ-श्यादिति भाव:। अपि पूर्वसमुच्चये। एवमाद्योदाहरणद्वयमुक्त्वा द्विती-योदाहरणद्वयमाह- 'कमलानि कमलानि' व्यक्तिविशेषेति। सौरभवि-शिष्टमलव्यक्तीत्यर्थ:।

**ताला जाअन्ति गुणा जाला ते सहिअएहि घेप्पन्ति।**
**रइकिइअणाणुगाहिआइं होन्ति कमलाइं कमलाइं।।**

**अस्य संस्कृतम् -**

**तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।**
**रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि।।**

अत्र पुनरुक्तकमलशब्द: सौरभादिगुिणविशिष्टे सङ्क्रमित:। सौरभातिशयो व्यङ्गय:। इत्यादौ इत्यादावपि।

त्वामस्मिवच्मि -

**त्वामस्मि वच्मि विदुषां समवायोऽत्र विद्यते।**
**आत्मीयां मतिमादायं स्थितिमत्र विधेहि तत्।।**

विद्वत्सभां गच्छन्तमाप्तं प्रति कस्यचिदुक्तिरियम्। अस्मदर्थसामान्यं शक्यमाप्तत्वविशिष्टोऽस्मदर्थस्तु लक्ष्य:, तयोश्च सामान्यविशेषभाव: सम्बन्ध इति भाव:।

**उक्तं यथा रत्नप्राभायाम् -**

तत्पदवाच्यत्वेन प्रसिद्धो यस्तद्भिन्नो योऽप्रसिद्धस्तटादिस्तद्रूप-व्यक्तिबोधे प्रसिद्धत्वविशिष्टव्यक्तिविशेषबोधे वा लक्षणेति व्यवहार:। गङ्गादिपदस्य प्रसिद्धोऽर्थ प्रवाहविशेषादि:, अप्रसिद्धस्तटादिरिति यावत्। प्रसिद्धत्वञ्च 'पदान्तररासमभिव्याहारेऽपि तज्जन्यप्रतीति विषयत्वम्' तच्च प्रवाहादावेव न तु तटादौ।

आरोपबीजं दर्शयन्नाह

'छत्रिणो यान्तीति' अत्र साहचर्यमेवारोपे बीजमितिभाव:। प्रसिद्धान्यव्यक्तिबोध इत्यस्योदाहरणद्वयं प्रदर्श्य व्यक्तिविशेषबोध इत्यस्योदाहरणद्वयमाह- 'कमलानि कमलानि' इत्यादौ सौरभाविशिष्टस्यैव कमलत्वेन बोध:। 'कमल' पदस्य कमलत्वाच्छिन्नविषयकबोधजनकत्वेऽपि कमलत्वव्याप्यधर्मावच्छिन्नस्य बोधो लक्षणयैव।

यथा-

**तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।**
**रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि।।**

अत्र पुनरुक्त 'कमल' पदं सौरभविशिष्टे संक्रमितम्। सौरभातिशयो व्यङ्ग्य:।

त्वामस्मि वच्मीति-

**''त्वामस्मि वच्मि विदुषां समवयोऽत्र तिष्ठति।**
**आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्''।।**

विद्वत्सभां जिगमिषुं कंचनाप्तं प्रति कस्यचिदुक्तिरियम्। अस्मदाद्यर्थसामान्यं शक्यमाप्तत्वविशिष्टोऽस्मदर्थस्तु लक्ष्य इति तयो: सामान्यविशेषभाव: सम्बन्ध:

**अत्र साम्यं वैषम्यं निष्कर्षश्च :-**

अत्र उभयो: टीकयो सामीप्यादिसम्बन्धमूलक शक्यताऽवच्छेदकारोप एव लक्षणा स्वीकृता। तौ छत्रिणो यान्ति, 'काकेभ्यो दधि', कमलानि कमलानि, त्वामस्मि वच्मि' इत्यादिषु उदाहरणेषु माध्यमेन शक्यताऽवच्छेदकारोपरूपालक्षणा स्पष्टीकृता।

**स्वोक्ते भाष्यकैयटयो: सम्मति: -**

'शक्यताऽवच्छेदकारोप एव लक्षणा' इति प्रमाणस्वरूपेण भाष्यकैयटयोः उद्धृत:। तत्र

**प्रथमं भाष्यसम्मतिः - उक्तं यथा लघुमञ्जूषायां -**

अत एव ''पुंयोगादाख्यायाम्' इति सूत्रे भाष्ये गोपीत्यादौ गोपसम्बन्धिस्त्रीत्वेन लक्षणायां 'तस्येदम्' इति शास्त्रेण तादृशेऽर्थेऽण् प्रत्ययान्तस्यैव तादृशवाक्यस्यैव वा साधुत्वनियमादसाधुत्वापत्तिं दूषणमभिसंधाय 'नावश्यमयमेवाभिसम्बन्धो भवति तस्येदमिति। किन्तु तन्मूलक: सोऽयमित्यप्यभिसम्बन्धोऽस्ति''

सा च लक्षणा तात्स्थ्यादिनिमित्तका इत्युक्त्वा लघुमञ्जूषायां ''चतुर्भि: प्रकारैरतस्मिन् स इत्येताद् भवति तादर्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात्, मञ्चाहसन्ति, सिंहो माणवक:, गङ्गायां घोष:, यष्टी: प्रवेशय'' इत्युक्तम्।

**उक्तं यथा परमलघुमञ्जूषायां-**

तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च।
तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधै:।। इति।

तात्स्थ्यात् 'मञ्जा हसन्ति' 'ग्राम: पलायित:'। ताद्धर्म्यात् 'सिंहो माणवक:' 'गौर्वाहीक:'। तत्सामीप्याद् 'गङ्गायां घोष:' तत्साहचर्याद् यष्टी: प्रवेशय:। तादर्थ्यात् 'इन्द्रार्था स्थूणा इन्द्र:'।

**अयमाशय: -**

इत्थञ्च शक्यतावच्छेदकारोपो लक्षणा इति लक्षणं शाब्दिकनिकाये बोध्यम्। तथा च उक्तस्थले 'गङ्गायां घोष:' इत्यत्र गङ्गात्वस्य तटे आरोप:। स च गङ्गात्वाभावतटं गङ्गात्वेन जानीयामिति आहारूपो ग्राह्य:।। न तु भ्रमरूप:। 'पुयोगादाख्यायाम्'' इति सूत्रे भाष्यकृता सङ्केतितेयं सरिण:। तथा च 'गोपी' इत्यादौ गोपस्येयमिति गोपसम्बन्धिस्त्रीत्वेनबोधे तस्येदमिति सूत्रेण तादृशेऽर्थेऽण् प्रत्यये सति 'गौणी' इति स्यात्। तादृशवाक्यस्यैव वा साधुत्वं स्यादिति 'गोपी' इत्यस्यासाधुत्वमाशङ्क्य नावश्यमयमेवाभिसम्बन्धी भवितुमर्हति त-स्येदमिति, किन्तु तन्मूलक: सोऽयमिक्ष्यष्यभिसम्बन्धीऽस्ति। चतुर्भि: प्रकारैरतस्मिन् स इत्येतद् भवति- तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामी-प्यात्। तत्साहचर्यात्।

**1. तात्स्थ्यात् -**

तात्स्थ्यं हि तत्र शक्यार्थबोध्य वस्तुनि तिष्ठतीति तत्स्थस्तस्य भाव इति। तात्स्थ्यादिनिमित्ते सत्येव लक्षणा भवति नान्यथेत्याशय:। यथा 'मञ्चा हसन्ति' 'ग्राम: पलायित:'। अत्र हि हसनं पलायनञ्च सचेतनधर्मस्तस्य निर्जीवे मञ्चे ग्रामे चाभावान्मुख्यार्थस्य वाक्येऽन्वया-भावेन मञ्चस्थजने ग्रामनिवासिजने चार्थे लक्षणा भवति तात्स्थ्यनि-मित्तेन।

**2. ताद्धर्म्यात् -**

तस्य शक्यार्थस्य धर्म इव धर्मो यस्य तद्धर्मस्तस्य भावस्ताद्धर्म्याति तस्मात्। यथा 'सिंहो माणवक:' ''गौर्वाहीक:'' इत्यत्र माणवकेन सह सिंहपदशक्यार्थमृगेन्द्रस्य वाहीकेन सह गोपदश-क्यार्थस्यान्वयाभावेन ताद्धम्र्यात् सिंह पदस्य तत्सहजातशौर्यादिगुणे गोपदस्य तत्सहजातजाड्याद्यवगुणेऽर्थे लक्षणा येन शौर्यादिगुणविशि-ष्टस्य माणवकस्य जाड्याद्यवगुणविशिष्टस्य वाहीकस्य च बोध:।

**3.तत्सामीप्यात् –**

तस्य शक्यार्थस्य सामीप्यं नैकत्येनावस्थानं तस्मा-द्यथा 'गङ्गायां घोष:' इत्यत्र गङ्गापदशक्यार्थप्रवाहे घोषासम्भवाद्वा-क्ये, तस्यान्वयाभावेन तत्समीपवर्तिनि तटेऽर्थे लक्षणा तत्सामीप्यात्।

**4. तत्साहचर्यात् –**

तस्य शक्यार्थस्य साहचर्यं सहस्थितिस्तस्मात्। यथा- 'यष्टी: प्रवेशय' इत्यत्र यष्टिपदशक्यार्थदण्डस्य प्रवेशनकार्या-सम्भवेन वाक्येऽन्वयाभावात्तत् साहचर्येण तद्धारिपुरषे लक्षणा।

**5. तदर्थ्यात् –**

तस्य शक्यार्थस्यार्थ: प्रयोजनं तदर्थस्तस्य भावास्तादर्थ्यं तस्मात्, तस्मै इदं तदर्थस्तस्य भावो वा। यथा ''इन्द्रार्था स्थूला: इन्द्र:'' इत्यत्र 'स्थूणपदशक्यार्थस्तम्भस्य इन्द्रपदेन सहान्वयाभावत् तादर्थ्यात् निमित्तकेऽर्थे लक्षणा।
अत्र कैयटोऽपि - 'आरोप्यते, ताद्रूप्यं, न तु मुख्यम्। बालेषु मञ्चत्वारोपन्मञ्चपदप्रवृत्तिर्हसन्तीति पदान्तप्रयोगाद् विज्ञायते इति।

**अस्मिन् पक्षे बाधज्ञानस्य न प्रतिबन्धकता -**
ननु 'गङ्गायां घोष:' इत्यत्र आरोपितगङ्गात्वेन तटस्य बोध इति तज्ज्ञानस्य भ्रमत्वे तदुत्तरं गङ्गागतशैत्यपावनत्वप्रतीतिरूपं फलं न सिद्ध्येत। अत एव शुक्तौ रजतज्ञाने भ्रमत्वज्ञानवत: पुसो न प्रवृत्तिरिति चेत्। उच्यते- मध्ये व्यञ्जनया तटे मुख्यगङ्गापदार्थाभेदस्यापि बोध:। व्यञ्जनाजन्यज्ञाने अन्वयबोधानुपपत्तिमूलके आरोपितार्थविषयकबोधे च बाधनिश्चयेनाप्रामाण्यग्रहो न जायते। यतोहि बाधनिश्चये प्रतिबन्धकत्वं हि तद्वताबुद्धेरप्रमात्वबोधनरूपमेव। तच्चानाहार्यज्ञा-नस्यैव भवितुमर्हति, आहार्यञ्च प्रमाभिन्नमेव। अत्र तु आहार्यमेव ज्ञान-मिति पूर्वमेवोक्तमिति न तस्य प्रतिबध्यत्वम् न चापि प्रतिबन्धकत्वम्। वैयाकरणमते चायं प्रत्यक्षभिन्नोऽपि सिद्धान्तित इति अत्र तस्य शाब्दबोधात्मकत्वेऽपि न दोष:। एवञ्च 'स्थाली पचति'' इत्यादौ पचिधातुवाच्ये स्थालीस्थे व्यापारे एकदेशेभूतेऽपि अधिश्रयणाद्यधः श्रयणान्तव्यापारत्वारोपेण तद्विषयकबोधे नाप्रमात्वग्रह:। अन्यथा अनुपपत्तिपरिहारो न सम्भवेत्।

**'शक्यताऽवहच्छेदकारोप एव लक्षणां इत्यस्यैव समर्थनम् -**
ननु 'कुन्ता: प्रविशन्ति' इत्यादौ पुरुषमात्रस्यारोपितकुन्तत्वेन प्रवेशान्वयेऽजहत्स्वार्थलक्षणात्वन्न स्यादत आह - ''कुन्ता: प्रविश-न्ति'' इत्यादौ कुन्तसंयोगविशिष्टपुरुषाणां कुन्तत्वेन प्रतीतिरित्यजह-त्स्वार्थात्वोपपत्ति:।'' अर्थात् तथा सति कुन्तसंयोग विशिष्टपुरुषाणां तत्र कुन्तत्वेनान्वयादजहत्स्वार्थात्वोपपत्तिरिति भाव:। आरोपे कैयट-प्रमाणमाह - ''आरोप्यते ताद्रूप्यम् न तु मुख्यम्। बालेषु मञ्चत्वारोपा-न्मञ्च पदप्रवृत्ति:'' 'हसन्ति' इति पदान्तरप्रयोगाद् विज्ञायते' इति।
रत्नप्रभायां -
'ननु' शक्यताऽवच्छेदकान्यरूपेण ज्ञाते लक्षणा भवति। इत्यर्थक 'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा' इति व्युत्पत्तिविरोधोऽत आह शक्यसम्बन्धरूपलक्षणायां यद्यपि ज्ञाप्यसम्बन्धरूपात्लक्षणापेक्षया लाघवं नि:संशयमनुभूयते। वाक्यस्फोट-वादिशाब्दिकानां सिद्धान्ते तु वाक्येष्वपि शक्तेर्विद्यमानत्वात् तत्रापि तस्या अङ्गीकारे कश्चनापि विरोधो नास्ति। तथापि वैयाकरणानां नये न सम्मान्यते एषा, भगवता पतञ्जलिना अननुमोदितत्वात्। यथोत्तरं मुनीनां प्रामाण्यमिति सिद्धान्त: सुप्रसिद्ध एव।

किञ्च तादृशारोपे एवोक्तसम्बन्ध: प्रयोजकत्वेन सामर्थ्यविरहितो भवति। अन्यच्च ''गङ्गायां मीनघोषौ स्त:'' इत्यत्र आरोपपक्षे एव शाब्दबोधजनकत्वं सम्भवति। अन्यथा ''अजाविधनौदेवदत्त-यज्ञदत्तौ'' इत्यत्र द्वन्द्वाद्यर्थस्यैक धर्मावच्छिन्नेऽन्वयस्य, तथा भूतस्य द्वन्द्वाद्यऽर्थेऽन्वयस्यैव वा यथासंख्यान्वये द्वन्द्वास्यावृत्तये 'पय: पयो नयति', इत्यत्र चैकशेषव्यावृत्तये चावश्यकत्वाद् अन्यरीत्या च मीनस्य नीरत्वावच्छिन्नेऽन्वयेन घोषस्य च तीरन्वावच्छिन्नेऽन्वयेन द्वन्द्वस्यासाधुता सम्भवेत्। स्वमते तु गङ्गात्वेनैव तीरस्यापि प्रतीते: एकध-र्मा:वच्छिन्नेऽन्वयसम्भवेन दोषाभाव:, इष्टापत्तिश्च सम्भवति।
यत्र यौगपद्येन वृत्तिद्वयं प्रसरति, तत्रैव तद्दोषावहं भवति, यत्र तु क्रमिकम्, न तत्र कश्चन दोषलेश:, यथा 'चित्रगुधनम्' इत्यादौ बहुव्रीहौ चित्राभिन्नगोस्वामिनि गोपदं लाक्षणिकम्। तत: षष्ठीतत्पुरुषे तादृशस्वामिसम्बन्धिनि इति क्रमिकं लक्षणाद्वयं परैरभ्युपगम्यत एव।

पूर्वमुक्ता प्रतीतिरूपस्थितिर्वापि न केनाऽपि प्रकारेण लक्षणा-त्वेनाङ्गीकर्तुं सम्भवा, अनुपदमुक्तोपपत्ते:। अन्य प्रसङ्गेन तत्र कार्यका-रणभावकल्पनायां गौरवस्यापि विशदं प्रतिपादितत्वाच्च। एवञ्चोक्ता-रोप एव लक्षणात्वेन सर्वथा सम्माननीय इत्यनल्पकल्यनेनालम्।

**शक्यताऽवच्छेदकारोपे गौतमसम्मति: -**
सहचरेणात् यष्टी प्रवेशय यष्टित्वारोपे ब्राह्मणे साहचर्यादित्याधु-निकनैयायिकानां सिद्धान्तं दूषयन् तन्मूल सम्मतिमाह-महर्षिगौतमोऽपि आरोपरूपां इमां लक्षणां स्वीकरोति। तथा च - ''सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोग-साधनाधिपत्येभ्यो ब्राह्मणबालकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुपचार:' अत्र च भाष्यम् अतद्भावेऽपि तदुपचार इति अतच्छब्दस्य तेन शब्देनाभिधानमिति। यष्टीप्रवेशयष्टिवारोपे ब्राह्मणे साहचर्यात् स्थान: 'मञ्चा: क्रोशन्ति ' इति मञ्चस्था: पुरुषा अभिधीयन्ते। तादर्थ्यात्

‘कटार्थेषु वीरणेषु व्यूह्यमानेषु कटं करोति’ इति भवति। वृत्तात् यमो राजा, कुबेरो राजा, इति तद्ववद् वर्तते इति। मानात् - ‘आढकेन मिता: सक्तव आढकसक्तव:’ इति। धारणात् - तुलायां घृतं चन्दनं तुलाचन्दनम्’ इति।
सामीप्यात् - गङ्गायां गावश्चरन्ति इति देशोऽभिधीयते सन्निकृष्ट:। योगात् - कृष्णेन रागेण युक्त: शाटक: कृष्ण: इत्यभिधीयते साधनात् - ‘अन्नं प्राणा:’ इति। आधिपत्यात् - अयं पुरुष: कुलम्’ अयं गोत्रम् इति अत्र कुलाधिपत्येन पुरुषे राजत्वारोप: इति। अनयोश्च सूत्रभाष्य-यो: समवलोकनात् स्पष्टतया आरोपात्मिका लक्षणा न्यायविदां साम्यता इति नाऽविदितविद्यावताम्।।

**न्यायवार्तिककारोऽपि -**
उक्तानुक्तदुरुक्तचिन्ताकरं वाक्यं वार्तिकम्। ननूपनिषद्वार्तिकेऽ-व्याप्ति:, उपनिषत्सु दुरुक्तत्वाभावादिति चेत्, न, भ्रमात्मकदुरुक्त-त्वस्य तत्रापि सम्भवात्। ननु साहचर्यस्य सामानाधिकरण्यरूपत्वात्पु-रुषस्य यष्टिकया सह प्रकृते तदभावाल्लक्षणा न स्यादत आह - वैयाकरणसिद्धान्तलघुमञ्जूषायां - ‘‘साहचर्यं नाम यष्टिकया सम्बन्ध:, तत्सम्बन्धात्तु ‘यष्टिकावान्’ इत्येव स्यान्नतु ‘यष्टिका’ इति। ‘यष्टिकावान्’ इति तु मुख्य एव। अत्र रत्नप्रभाकृतस्तु - ब्राह्मणेन संयुक्तापष्टिकातत्र समवेतां यष्टिकात्वजातिं समवायसम्बन्धेन ब्राह्मणे आरोप्य ब्राह्मणे ‘यष्टिकां’ शब्द प्रयोग:। यद्वा स्व-समवापि संयोग सम्बन्धेन यष्टिकात्वस्य ब्राह्मणे सत्त्वात् तथा प्रयोगो बोध्य:।
**अत्र पक्षे गोण्यामुपपत्तिमाह -**
गौर्वाहीक: इत्यादावपि - साधारणधर्मजडत्वादिरूपेण निमित्तेन वाहीकस्यारोपित-गौत्वेन बोध:।
**अत्र कलाकृतस्तु -**
लक्ष्यतावच्छेदकगुणैर्योगात्तद् द्वारकसम्बन्धाद्या वृत्तिर्गोशब्दस्य वाहीकार्थोप-स्थापकता तस्या गौणतेष्टेत्यर्थ:। आद्ये गुणयोगाभावो द्वितीयेगुणे एव वृत्ति:, न तु तद्योगात् वाहीके इति तयोरनिष्टत्वम्। तथा च गुणलक्ष्यतावच्छेदिका लक्षणा गौणीति भाव:।
भावप्रधानप्रसङ्गे उक्तं रत्नप्रभायां -
यदा ‘घट’ शब्दस्य घटत्वमात्रपरत्वं तदा भावप्रधाननिर्देश इत्युच्यते। समवायसम्बन्धेन तदभावद्विद्धशेष्यकतत्प्रकारकज्ञानविषयीकरणादित्यर्थ:। समवायस-म्बन्धावच्छिन्नघटत्वनिष्ठप्रकारतानिरूपितघटत्वनिष्ठविशेष्यताकबोध इत्यर्थ:।
‘अन्नं प्राणा:’, ‘चन्दनं तुलां’ इत्यादावाहार्यारोपस्यैव लक्षणात्वादिति बोध्यम् अर्थात् तदभाववद्विशेष्यकतत्प्रकारकेच्छाजन्यज्ञानरूपस्यैवेत्यर्थ:।
**निष्कर्ष: -**
‘शक्यताऽवच्छेदकारोपे एव लक्षणा’ इति प्रसङ्गे गौतम: ‘सहचरण...इत्यादिषु दशसु पदार्थेषु माध्यमेन स्पष्टं कृतवान्। न्यायवार्तिककारोऽपि समवायसम्बन्धेन तद्भाववद्विशेष्यकतत्प्रका-रकज्ञानविषयीकरणादित्यर्थ: आरोपितेन लक्षणा स्वीकृतम्। ‘यष्टी: प्रवेशय’, ‘गोर्वाहीक:’ इत्यादिषु प्रयोगेण आरोपिता लक्षणा स्पष्टा जाता। स: प्रयोजनवती गौणी लक्षणाया फलं सिद्धयति। शक्य-तावच्छेदकारोप एव लक्षणेति पक्षे ‘व्रीहीन् प्रोक्षती’ इत्यादौ निर्वाह प्रकार:।
उक्तं यथा लघुमञ्जूषायां - ‘व्रीहीन्प्रोक्षति’ इत्यादावपूर्वसा-धनीभूतव्यक्तीनामेव तात्पर्यवशादव्रीहिपदेन व्रीहित्वेन भानम्। एवं तत्प्रतिनिधिष्वपि व्रीहित्वमारोप्य व्रीहित्वेनैव तात्पर्यवशादपूर्वसा-धनीभूततत्प्रतिनिधिव्यक्तीनां भानं, न त्वपूर्वसाधनत्वेन भानम्। अत्र सर्वत्र तत्तद्र्धमविशिष्टे शक्यतावच्छेदकधर्मारोप:।

**अत्र कुञ्चिकाकृतस्तु -**
व्रीहीन्प्रोक्षतीत्यादावपूर्वसाधननीवारेषु व्रीहित्वमारोप्यत इति प्रतिपादयितुमाह- व्रीहीन्प्रोक्षतीति। केषाचित्साहचर्येण जाति: शक्त्युपलक्षणमिति हर्युक्तरीत्या व्रीहित्वजात्युपलक्षिता शक्तिरेव क्रिया-साधनत्वेनापदिश्यते। एवञ्च जातिक्रिययोरेव विभक्तिप्रापित: श्रौत: सम्बन्ध:।
**उक्तं यथा रत्नप्रभायां -**
नन्वपूर्वसाधनीभूतव्यक्तिमात्रस्य प्रोक्षणदर्शनाद् ‘व्रीहीन् प्रोक्षति’’ इत्यनुपपन्नमत आह - व्रीहीन्प्रोक्षीत्यादाविति।
अयं भाव: -

**खदिरादिष्वशक्तेषु शक्ति: प्रतिनिधीयते।**
**केषाञ्चित्साहचर्येण जाति: शक्त्युपलक्षणम्।।**

इति हर्युक्तेर्व्रीहित्वजात्युपलक्षिता शक्तिरेव क्रियासाधनत्वेन व्यपदिश्यते। तथा च जातिक्रिययोरेव विभक्तिबोधितश्रोतसम्बन्ध:।

**निष्कर्ष:-**

''व्रीहीन् प्रोज्ञति'' इत्यत्र तात्त्पर्यवशात् व्रीहीपदेन व्रीहित्वेन भानं जात:। अत: 'शक्यताऽवच्छेद व्रीहित्वधर्मस्य आरोप एव लक्षणा' इति स्वरूपम्। अत्र सर्वत्र तत्तद्धर्मविशिष्टे शक्यतावच्छेद-कधर्मारोप:।

**कचतस्त्रस्यति वदनम् इत्यादावारोपस्योपपादनम्**

'कचतस्त्रस्यति वदनम्' इत्यादौ राहुत्वाविशिष्टे कचत्वारोप:, चन्द्रत्व विशिष्टे च वदनत्वारोप इति न त्रासान्वये काचिदनुपपत्ति:। अत्र प्रथमारोपेण त्रासप्रयोजनकत्वमारोपितकचत्ववति राहौ किञ्च 'कचत:' इत्यत्र तदर्थप्रयोजकत्वस्य स्वनिरूपितप्रयोज्यत्वसम्बन्धेन भासेऽन्वय उपपद्यते। अन्यथा कचपदार्थ: केशस्तत्प्रयोज्यत्वस्य भासे बाधात् स नोपपद्यते। द्वितीयारोपेण त्रासकर्तृत्वस्यारोपितवदनत्ववति चन्द्रे किं वा चन्द्रस्य तिबर्थे कर्तरि अभेदेन, तादृशकर्तुश्च वृत्तित्व-सम्बन्धेन भासेऽन्वय: सम्पद्यते। अन्यथा भासस्य चेतनधर्मतया वदनस्य तु चेतनत्वाभावेन स न स्यात्।

रत्नप्रभायां अर्थात् शक्यार्थस्य य: साक्षात्सम्बन्धस्तन्मूलकारो-पापेक्षया मुख्यार्थवृत्तिर्यो गुणो जाड्यादिस्तत्सदृशो यो गुणो वाहीक-गतजाड्यादिस्तद्गुणवत्वरूपपरम्परासम्बन्धमूलको य आरोप: स जघ-न्यः इति आरोपितगतजन्यव्याप्तिजघन्यत्वमादाय वृत्तावपि तद्व्यहार इति भाव:।

**व्यञ्जनया गुणबोधकत्वे भाष्यविरोधपरिहार:, आरोपे पतञ्जल्यादि-सम्मतिश्च**

नन्वेवं लक्षणाप्रयोजनस्य शाब्दबोधोपपत्तये व्यञ्जनावृत्तिस्वी-कारे गवादिपदानां व्यञ्जनयाऽतिशयितजाड्यादिगुणवाचकतया प्रकारे गुणवचनस्य इति द्वित्वापत्तिरत आह उक्तं यथा रत्नप्रभायां - 'अग्निर्माणवक:' गौर्वाहीक:' इत्यादौ सादृश्ये वर्तमानानां गुणवचना-नामग्निगवादिशब्दानां द्वित्वापत्तिमाशङ्क्य भाष्यकृता समाहितम् ''सर्वश्च शब्द: प्रकारे वर्तमानो गुणवचन: सम्पद्यते तत एवं विज्ञास्याम: प्राक् प्रकाराद्यो गुणक्वन इति''। प्रकारे वर्तनात्प्राग् यो गुणवचनो यथा 'पटु: मृदु:' इति। नायं गोशब्दोऽग्निशब्दो वा प्रकारेऽर्थे वर्तनात् प्राग् गुणवचन: किन्तु जातिवचन इति नात्र द्वित्वापत्तिरिति तदाशय:।

'प्रकारे गुणवचनस्य' इति सूत्रस्थभाष्यविरोध इति शक्यता-ऽवच्छेदकारोपपक्षे गुणवचनत्वाभावाद् व्यञ्जनावृत्तिस्वीकारे गुणवच-नत्वाच्च भाष्यकृच्छङ्कासमाधानविरोधो नेत्यर्थ:। यत्तु, 'गो' शब्दस्य सादृशयलक्षकत्वेन 'गुणवचनत्वम्' इत्यभिप्रायेण भाष्ये द्वित्वाशङ्केति, तन्न, 'सादृश्यनिमित्तकाभेदोपचाराद् 'गोप' शब्दो गोप्यां वर्तते' इति 'पुयोगात्०' इति सूत्रस्थभाष्यविरोधात्। न हि तत: सृदशे लक्षणेति लभ्यते।

गङ्गायां घोष: इत्यत्र पुन: कश्चनविशेष: -

प्रकृतिप्रत्ययान्यतरमात्रप्रसङ्गे लक्षणाविवेक: -

यत्तु केवलयो: प्रकृतिप्रत्यययो: प्रयुज्यमानयो: विशिष्टार्थे लक्षणा परमते स्वीक्रियते। तथा च उक्तं वै.सि.ल.म. -

यत्र तु प्रकृतिप्रत्यययोर्लोपानुशासनं तत्र 'इयान्' 'गर्गा:' इत्यादौ प्रकृतिगर्भेऽर्थे प्रत्ययस्य, गर्गापत्यरूपेऽर्थे प्रकृते: साधुत्वं लोपानुशासनबलादिति वदन्ति।

**अयमाशयः -**

'द्विरेफ' पदे लक्षणाखण्डनमुच्चारितानामेव प्रत्यायकत्वनिरूपणश्च -

प्राचीननैयायिकमतेन लक्षितलक्षणा -

प्राचीननैयायिको लक्षणायां अपरमपि लक्षितलक्षणावृत्तिभेदं मनुते। नैयायिकै: भ्रमरपद माध्यमेन लक्षितलक्षणा स्पष्टं कृतम्। उक्तं यथा परमलघुमञ्जूषायां 'लक्षिते लक्षितस्य वा लक्षणा लक्षितलक्षणा' अस्य व्युत्पत्यानुसारेण लक्षितस्य पूर्व लक्षणाविषयतां प्रापितस्य लक्षिते वा लक्षणा इति तदाख्या वृत्तिरिति।

उक्तं यथा - ''द्विरेफपदस्य स्वलक्ष्यभ्रमरशब्दावाच्यार्थे लक्षणायां लक्षितलक्षणेति व्यवहार:। स्वबोध्यपदवाच्यत्वं सम्बन्ध:।''

नव्यनैयायिकैः अस्य 'लक्षितलक्षणायां अपरभेद न मन्यते, ते 'जहल्लक्षणायां एव अन्तर्भाव स्वीक्रियते। उक्तं यथा - ''अत्र द्विरेफादिपदे रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते। भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते, इति तत्र 'लक्षितलक्षणा' जहल्लक्षणा एव इति नव्य-नैयायिका:।

**अस्यायमाशय:**

द्विरेफ इति यत्पदं तद् द्वौ रेफौ यत्रेति व्युत्पत्त्या योगार्थत्वेन प्रथमं रेफद्वययुक्तपदं बोधयति ततश्च लक्षणया रेफद्वययुक्तत्वेन भ्रमरपदं लक्षयति। लक्षिते चेत्थं द्विरेफपदाद् भ्रमरशब्दे तस्य वाच्यार्थभूत-मधुपार्थं बोधयति। तेन लक्षिते लक्षितस्य वा लक्षणेत्यत्र लक्षित-लक्षणा। इयं हि शक्यार्थस्य परम्परासम्बन्धरूपेति विपश्चित:। द्विरेफस्य शब्दकर्तृत्वान्वयानुपपत्त्या प्रथमं, भ्रमरशब्दबोधस्ततस्त-द्वाच्यार्थभूतमधुपार्थबोध इति स्वबोध्यपदवाच्यत्वमत्र यत्र स्वं द्विरेफपदं तद्बोध्यं भ्रमरपदं तद्वाच्यत्वं भ्रमररूपार्थे इति। भ्रमरेपदे लक्षणाया अभावे तु तदर्थस्य द्विरेफपदनिष्ठवृत्त्याऽनुपस्थापितत्वेन 'द्विरेफं पश्य' इत्यादौ कर्मत्वान्वय एव न स्यादिति द्विरेफपदस्य लक्षितलक्षणावृत्ति: तेन न लक्षितेन भ्रमरपदेन शक्त्यैव बोधसम्भवाद् व्यर्थं लक्षणाकल्पनमिति वाच्यम्। केचित्तु रेफपदस्य स्वशक्यद्वयघटि-तभ्रमरपदशक्यत्वरूपपरम्परासम्बन्धेन द्विरेफपदलक्षणयैव बोधसम्भ-वाल्लक्षितलक्षणारूपं वृत्त्यन्तरं नाङ्गीकुर्वन्ति।

**निष्कर्ष: -**

नैयायिकैर्भ्रमरपदे लक्षितलक्षणा मन्यते। तत्र शक्यार्थस्य परम्परासम्बन्धेन लक्षणा लक्षितलक्षणा प्रोच्यते। यथा द्विरेफपदस्य रेफद्वयमित्यर्थो बोध्यते। तच्च साक्षात्सम्बन्धेन भ्रमरपदं बोधयति।

भ्रमरपदेन भ्रमरोऽर्थोऽवगम्यते। अत्र द्विरेफपदेन साक्षाद् भ्रमररूपोऽर्थो न बोध्यते किन्तु स्वावाच्यरेफद्वयघटितपद-वाच्यत्वपरम्परया भ्रमरार्थस्य बोधो जायते। यथोक्तम् -

''यत्र तु शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षित-लक्षणेत्युच्यते। यथा द्विरेफपदाद् रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते। भ्रमरपदस्य सम्बन्धो भ्रमरे ज्ञायते इति तत्र लक्षितलक्षणा।''

परश्च लाक्षणिकं पदं शाब्दबोधे न कारणमिति प्राचीनानां मतम्। लाक्षणिकं पदं तु केवलमर्थस्मारकं भवति। तत्र शाब्दबोधे पदान्तरं कारणं भवति। नवीनमते तु पदद्वयेऽपि लक्षणया लाक्षणिकपदेनापि शाब्दबोधो जायते।

मीमांसकैर्गभीरायां नद्यां घोष: इत्यादौ नदीपदस्य नदीतीरे लक्षणया गभीरस्य नदीतीरेऽन्वयो न भवितुमर्हति। अत एकदेशान्वयेन लक्षणा मन्यते। यथा मुक्तावल्यामुक्तम् -

''किन्तु लाक्षणिकं पदं नानुभावकम्''। लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणं। शक्तिलक्षणान्यतरसम्बन्धेनेतरपदार्था-न्वितस्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणात्। वाक्ये तु शक्तेरभावाच्छक्यसम्बन्धरूपा लक्षणापि नास्ति। यत्र तु गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा। गभीरपदार्थस्य नद्या सहाभेदेनान्वय:, क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात्''।

**द्विरेफपदे नैयायिकाभिमतलक्षणाखण्डनम् मूले लघुमञ्जूषायाम् -**

'द्विरेफपदं तु रूढिशक्त्या भ्रमरबोधकम्। अव्ययवार्थ प्रतीतिस्तु नास्त्येव, रथन्तरादिपदवत्। अर्थात् वैयाकरणास्तु, द्विरेफपदेन रथन्तरवत् रूढिशक्त्यैव भ्रमरार्थो बोध्यते यद्वा पदनिष्ठरेफद्वयस्वार्थे आरोपात्तत्सम्बन्धित्वेनैव तेन भ्रमरबोध इत्यामनन्ति। इत्थं रूढि-शक्त्या योगशक्त्या वा द्विरेफपदाद् भ्रमरार्थबोध: इति तन्मतम्। तदनुसृत्यैव कोशेष्वपि द्विरेफ शब्दो भ्रमरपर्यायवाचित्वेन पठित: -

**''मधुव्रतो मधुकरो मधुलिण्मधुपालिन:।**

**द्विरेफ-पुष्पलिड्-भृङ्ग-षट्पद-भ्रमरालय:। इति''**

अत: बाधप्रतिसंधानं विनैव द्विरेफपदाद् भ्रमरबोधेन लक्षणेत्ययुक्तम्।

**रत्नप्रभायां-**

'द्विरेफ' पद घटकस्योत्तरपदभूतस्य 'रेफ' पदस्य रेफद्वयसम्बन्धिनि 'भ्रमर' पदे लक्षणा। लक्षितस्य 'भ्रमर' पदस्य च भ्रमररूपेऽर्थे लक्षणेत्याहुस्तन्निराकर्तुमुपक्रमते -

लक्षितं यद् 'भ्रमरं' पदं तेन लक्षणया बोधादेवेत्यर्थः। ननु लक्षितेन 'भ्रमर' पदेन शक्त्यैव बोधसम्भवाल्लक्षणेति व्यर्थमिति चेत्, न, 'भ्रमर' पदे लक्षणास्वीकारे 'द्विरेफ' पदे लक्षितलक्षणारूपं वृत्त्यन्तरं स्वीक्रियते। तथा च द्विरेफं पश्य' इत्यादौ भ्रमररूपार्थस्य 'द्विरेफ' पदनिष्ठ लक्षितलक्षणारूपवृत्त्योपस्थापितत्वेन तत्र द्वितीयार्थकर्मत्वस्य 'प्रकृत्यर्थान्वितस्थार्थ बोधकत्वं प्रत्ययानाम्' इति न्यायानुरोधेन कर्मत्वान्वयानुरोधेन तदावश्यकत्वात्। 'भ्रमर' पदे लक्षणाया अभावे तु तदर्थस्य 'द्विरेफ' पदनिष्ठवृत्त्याऽनुपस्थापितत्वेन तत्र कर्मत्वान्वयो न स्यादिति 'द्विरेफ' पदस्यैव लक्षितलक्षणावृत्तिः।

ननु 'प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति न्यायविरोधोऽत आह - प्रत्ययार्थान्वये च प्रकृतिप्रयोज्योपस्थितिः कारणमिति वाच्यम्, एवमपि तस्यानुच्चारित्वेनोच्चारितस्यैव च बोधकत्वेन ततो बोधानापत्तेः। उच्चारितस्यैव बोधकत्वमिति ''अणुदित् सर्वणस्य चाऽप्रत्ययः'' इति सूत्रे भाष्ये स्पष्टम्।

**अत्र कलाकृतस्तु -** पुस्तकदर्शनस्थले केनचिदुक्तं व्यभिचारमुद्धरति एकान्ते पुस्तकदर्शनस्थलेऽपि मानसजपवत् सूक्ष्मतरताल्वादिव्यापारेण सूक्ष्मतरं स्वोच्चारणमस्त्येवेति न दोषः।

जपप्रसङ्गे जपे मन्त्राणां उच्चारणैः उदात्तानुदात्तस्वरितस्य ज्ञानं आवश्यको वर्तते। तस्य च तत्तत्स्थानेषूच्चदेशाद्युपलभ्यमानत्वरूपतया जपे सूक्ष्ममुच्चारणमावश्यकम्। इदमेव च स्मृतिषु मानसमुच्चारण-मित्युच्यते।

**अत्र रत्नप्रभाकृतस्तु -** 'यज्ञकर्मण्यजपन्युङ्खसामसु' इति जपे एक-श्रुतिनिषेधादितिभावः। वस्तुतस्तु जपो नाम - 'अदृष्टार्थशब्दोच्चारणमात्रम्' इति यज्ञविषये पारिभाषिको 'जप' शब्द इति न तेन मानसजपस्थलेऽपि सूक्ष्मोच्चारणं लभ्यत इति कश्चित्।

**अत्र कुञ्चिकाकृतस्तु -**

वस्तुतस्तु अदृष्टार्थं शब्दोच्चारणमात्रं जप इति। यज्ञविषये पारिभाषिको भिन्न एव जपशब्दः। यद्यपि -

**जपश्च द्विविधः प्रोक्तो वाचिको मानसस्तथा।**<br>**वाचिको पांशु उच्चैश्च द्विविधः परिकीर्तितः।।**<br>**मानसाच्च जपाद् ध्यानं सहस्रगुणमुच्यते।।**

**अत्रकलाकृतस्तु -** इदं तन्त्रसारे गौतमीयत्वेनोक्तम् - 'जपः स्मादक्षरावृत्तिर्मानसोपां-शुवाचकैः' इत्यादिः।

**जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः।**<br>**किञ्चिच्छवणयोग्यः स्यादुपांशुः स जपः स्मृतः।**<br>**मन्त्रमुच्चोरयेद्वाचा वाचिकः स जपः स्मृतः।।**

यद्यपि क्वचित् मानसजपे उच्चारणाभाव एव लभ्यते तथाप्येतत्स्मृत्यविरोधाय मानसेऽपि बुद्धिपरिकल्पितमुच्चारणं स्वीकार्य्यम्।

तथा च भारद्वाजः -

**सूतके मृतके कुर्यात्प्राणयाममन्त्रकम्।**<br>**तथा मार्जनमन्त्रास्तु मनसोच्चार्य मार्जयेत्।**<br>**गायत्रीं सम्यगुच्चार्य सूर्यायाध्र्यं निवेदयेत्।। इति।**

अर्थात् जननाशौचे मरणाशौचे च अमन्त्रकं प्राणायामं कुर्यात् तथा मार्जनमन्त्रेषु मनसोच्चार्य मार्जनं कुर्यात्। गायत्रीमंत्रस्य सम्यगुच्चार्य सूर्यदेवतायै अर्घ्यं निवेदयति।

किञ्च मानसजपलक्षणे - मूले -

**धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम्।**<br>**उच्चरेदर्थसंस्मृत्या स उक्तो मानसो जपः।।**

अर्थात् वर्णस्वरपदेन घटितः अक्षरेश्रेणीं अर्थस्मरणपूर्वकोच्चारणं मानसजप कथ्यते।

अत्र मानसजप लक्षणे विषये कलारत्नप्रभायां साम्यं वर्तते- तदुक्तं नृसिंह पुराणे- ''त्रिविधो जप यज्ञः स्यात्तस्य भेदं निबोधत।

**वाचिकश्च उपांशुश्च मानसस्त्रिविधः स्मृतः।**<br>**त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः।।**<br>**यदुच्चनीचोच्चरितैः शब्दैः स्पष्टपदाक्षरैः।**<br>**मन्त्रमुच्चारयेद् वाचा वाचिकोऽयं जपः स्मृतः।।**

**शनैरुच्चारयेन्मत्रमीषदोष्ठौ प्रचालयन्।**
**अपरैरश्रुत: किञ्चित् स उपांशुजप: स्मृत:।।**
**धिया यदक्षरश्रेण्या वर्णाद् वर्ण पदात्पदम्।**
**शब्दार्थचिन्तनं भूय: कथ्यते मानसो जप:।।''**

इत्यादिववचनात्सूक्ष्योच्चारणं मानसेऽपि लभ्यते।

यथा च घ्राणेन्द्रियगृहीतस्यैव गन्धस्य सुखादि जनकत्वं न स्मृतस्य, यथा च महत: पटहादिशब्दस्य कर्णपीडाजनकत्वं श्रुतस्यैव न स्मृतस्य, तथा पदानां बोधजनकत्वं श्रुतानामेव न यथाकथञ्चित्प्र-तीतीनाम्। यथा तत्र सुखादिजनकताऽवच्छेदकवैजात्येन तेषां नान्यतो ग्रहस्तथा प्रकृतेऽपि। अत एव 'परोक्षे लिट्' इति सूत्रे 'परोक्षे' इति न धातोर्विशेषणम्, शब्दरूपस्य तस्य परोक्षत्वासम्भवात् इति भाष्यकैयटयोरुक्तम्। अर्थात् इन्द्रियसन्निकर्षजन्यं यद्वत्र्तमानकालिकं ज्ञानं तदीयविषयताविशिष्टगन्धत्वादेरेव सुखादिनिष्ठजन्यतानिरूपि-तजनकताऽवच्छेदकत्वादितिभाव:। कारणताऽवच्छेदकीभूतं यदुक्त-गन्धत्वादितदभावेनेत्यर्थ:। एवं 'भ्रमर' पदेऽपि वर्तमानकालिकश्रा-वणप्रत्यक्षविषयीभूतानुपूर्वीरूपकारणताऽवच्छेदकीभूतधर्मस्याभावान्न बोधजनकत्वं तस्येति भाव:।

अत: स्पष्टं जायते न च स्वबोध्यपदवाच्यत्सम्बन्धेन 'द्विरेफ' पदं लक्षणया भ्रमरं बोध्यतीति युक्तम्, अनुपपत्तिप्रतिसंधानं विनाऽपि बोधात्। गौण्यतिरिक्तस्थले साक्षात्सम्बन्धस्यैव लक्षणाबीजत्वाच्चेति दिक्।।

**निष्कर्ष: -** नैयायिका: स्वबोध्यपदवाच्यत्वसम्बन्धेन 'द्विरेफ' पदे लक्षणावृत्ति माध्यमेन 'भ्रमररूप' जन्तुविशेषस्य बोध कृतवान्। स्वं द्विरेफ पदं तद् बोध्यं 'भ्रमर' पदं तद्वाच्यत्वं भ्रमररूपेऽर्थे इति तत्सम्बन्धसत्वाद् बोधकत्वं। एवञ्च 'द्विरेफ' पदमेव निरूढलक्षणया स्वबोध्यपदवाच्यत्वसम्बन्धेन भ्रमरं बोधयेदिति परास्तम्। तस्माच्छक्यताऽवच्छेदकारोप एव लक्षणेति सिद्धा।

**सन्दर्भग्रन्था:**


1. पाणिनिः, अष्टाध्यायी, 7/2/63
2. यास्कः, निरुक्तम्, 1/4/1
3. पतञ्जलिः, व्याकरणमहाभाष्यम्
4. पाणिनिः, अष्टाध्यायी, 5/4/11
5. पाणिनिः, अष्टाध्यायी, 6/1/123
6. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी/उत्तरकृदन्त/अन्तिमश्लोक
7. नागेशभट्टः, लघुशब्देन्दुशेखरस्य मङ्गलश्लोक:
8. नागेशभट्टः, लघुशब्देन्दुशेखरस्य मङ्गलश्लोक
9. नागेशभट्टः, महाभाष्ये उद्योते मङ्गलश्लोकौ
10. नागेशभट्टः, लघुशब्देन्दुशेखरस्य मङ्गलश्लोक
11. 'रामरामात् = रामरामभट्टाचार्य' इति मञ्जूषाया: कलाटीका।
12. वात्स्यायनः, न्यायदर्शनः, 2.0.56
13. पाणिनिः, अष्टाध्यायी, 3.3.19
14. वैयाकरणसिद्धान्तलघुमञ्जूषा कलाटीका, मङ्गलाचरणम्
15. पतञ्जलिः, महाभाष्यम्, 1.4.106
16. नागेशः, महाभाष्यस्य उद्योतटीका, पस्पशाह्निकम्, 1.1
17. पाणिनिः, अष्टाध्यायी, सू.सं. 3.3.117
18. पाणिनिः, धातुपाठः, सं. 1373
19. पाणिनिः, अष्टाध्यायी, सू.सं. 3.3.16